अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

वर्षे ऽकः

पुनर्मुद्रितोंऽशः

१५ १९९

प्रधानसम्पादक :

डा० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्य :

देववाणी-परिषद्, दिल्ली

६ वाणी-विहारः, नयी दिल्ली-११००५९

परामर्शदातृ - मण्डलम्

. आचार्य डा. रमेशचन्द्र शुक्लः 2. आचार्य श्री श्रीनिवास रथः
3. डा. कृष्णकान्त शुक्ल : 4. डा. राजेन्द्र मिश्रः
5. डा. उमाकान्त शुक्लः 6. डा. विष्णुकान्त शुक्लः

अर्वाचीनसंस्कृतम् (13 / 4)

(R.N. 34554/79)

(15 जनवरी 1994 ई.)

विषय-सूची

विषयः	लेखकः	पृष्ठांकः
. *सम्पादकीयम्*		
2. सत्प्रेरणानाटकम्	डा०इच्छाराम द्विवेदी 'प्रणवः'	क-46
. मदीयकविते! कुरुष्व गानम्	रमाकान्त शुक्लः	... 47
. शारदावन्दनम्	डा०रामकिशोर मिश्रः	... 51
. मारीशस-महिमा	डा०शिवशरणशर्मा द्विवेदी	... 52
. देववाणी-परिषद्वार्ता	आनन्दवर्धनशुक्लः	... 53
. संस्कृतजगद्वार्ता:	रमा शुक्ला	... 55
. परमानन्दगुरून् प्रति	पं० भगवद्दत्त गौडः	... 57
. देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः		... 58

अर्वाचीनसंस्कृतम् (पंजी० स० 34554/79)

1. प्रकाशनस्थानम्-नयी दिल्ली।
2. प्रकाशनकालावधिः - त्रैमासिकम्।
3. संकेतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च - डॉ0 रमाकान्तशुक्लः, भारतीयः, देववाणी-परिषद्, दिल्ली, 6 वाणी-विहारः, नयी दिल्ली-110059.
4. पत्राधिकारिणां नाम्ना सह संकेतः-देववाणी-परिषद्, दिल्ली, 6 वाणी-विहारः, नयी दिल्ली-110059.

डा. रमाकान्त शुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति।

डा० रमाकान्त शुक्लः
26.1.1994 ई०
प्रकाशकः, सम्पादकः

सम्पादकीयम्

अनेनांकेन **'अर्वाचीनसंस्कृतम्'** षोडशवर्षं प्रविशति। अस्मिन्नंके प्राधान्येन डा. इच्छारामद्विवेदप्रणीतं **'सत्प्रेरणा'नाटकं** प्रकाश्यते। अस्य नाटकस्य नायकः कविशेखरः मानवसुलभदुर्बलतया सज्जनतया चोपश्लिष्टोऽस्ति। स हि रसिकोऽप्यस्ति, स्वकुलगौरवमपि रिरक्षति; भगवतो मन्मथस्य प्रहारैर्जर्जरितोऽप्यस्ति किञ्च शरणागतानां कल्याणमपि वाञ्छति। अन्ततोगत्वा स्वगुरोरुपदेशेनास्यं भावोपशमः संजायते। अत्र नाटके कीदृशी वस्तुनेतृरसयोजना, कीदृशं नाट्यपरम्परापालनं कीदृशं तदुल्लंघनम् किमत्रौचित्यं किञ्चानौचित्यमित्यत्र तु समीक्षका एव प्रमाणं भविष्यन्ति अस्माभिस्तु एका अभिनवा रचना विदुषां सहृदयानां च दृङ्मार्गातिथीक्रियते।

अस्माकं गुरव आसन् विद्यावाचस्पतयः पं. परमानन्दशास्त्रिणः। ते खुर्जास्थश्रीराधा कृष्ण-संस्कृतमहाविद्यालयस्य अत्यन्तं प्रभावशालिनः प्राचार्या आसन्। तेषां दिवंगमनं 2.1.1956 ई. तारिकायां खुर्जानगरेऽभूत्। तेषां शिष्य-प्रशिष्य - परम्परा महती खलु। तेषामन्यतमाः शिष्याः सन्ति पं. भगवद्दत्तगौडमहाभागा ये खलु उत्तरप्रदेशान्तर्गतबुलन्द शहरजनपदान्तःपातिरंगपुरग्रामे 8.3.1912 तारिकायां लब्धजनुषः चिरकालं यावदुत्तर प्रदेशसंस्कृतपाठशाला-निरीक्षकपदमलंकृत्याद्यत्वे 'कोठी 44/2 गढ़ रोड, जादूगिरि का बाग़, शान्ता स्मारक गर्ल्स इण्टर कालेज के पीछे, मेरठ 250002'-इत्यत्र निवसन्ति। एते महानुभावाः 16.12.1993 तारिकायां मयराष्ट्रविश्वविद्यालये 'स्व. श्रीकालीचरणपौराणिक न्यासनिधिना' समायोजिते व्याससमारोहे मया दृष्टाः प्रत्यभिज्ञाताश्च । एतेषामस्मत्स्वर्गीय पितृचरणेषु श्रीब्रह्मानन्दशुक्लेषु महती श्रद्धा विद्यते। गौडमहाशया मां स्वाशीर्भिरनुगृहीतवन्तः। तदनु प्रसक्त्यानुप्रसक्त्या तैः स्वरचितानि कतिपयानि पद्यानि श्रावितानि येषु स्व. पं0 परमानन्दशास्त्रिणां दिवंगमने प्रणीतानि कानिचन पद्यान्यप्यासन्। तान्यप्यस्मिन्नंके दीयन्ते। एका रचना मया उज्जयिन्यां कालिदाससमारोहे 26.12.1993 तारिकायां समायोजिते संस्कृत कविसमवाये, वाराणस्यां डा. सम्पूर्णानन्दविश्वविद्यालयस्य महाभवने 4.1.1994 ई तारिकायां रात्रौ समायोजिते 'डा. सम्पूर्णानन्द-जन्मशताब्दी-संस्कृतकविसंम्मेलने' 'दिल्ली संस्कृत अकादम्या' 21.1.1994 तारिकायां नवदिल्ल्यां हिमाचल-भवने समायोयिजतेऽखिल भारतीयसंस्कृतकविसम्मेलने च पठिता। अत्र जगणादि षोडशमात्रात्मकं वृत्तं मयानुवृत्तम्। अस्य नाम 'षोडशी' ति मया कल्पितम्। अन्या अपि काश्चन रचनाः प्रकाश्यन्ते।

देववाणी-परिषद्वार्ताः [illegible]तजगद्वार्ताश्च यथावकाशं दीयन्ते। बहुभिरस्मन्मित्रै-र्नूतनसंवत्सर-मंगलेच्छाः प्र[illegible] सन्ति। एतान् सर्वान् प्रति कृतज्ञतामनुभवामि- 'नूतने वत्सरे वो भवेन्मंगलम्'।

गणतन्त्रदिवसः

विदुषामाश्रवः

26.1.1994. ई.
आर 6 वाणी विहारः,
नयी दिल्ली-110059.

(रमाकान्त शुक्लः)
प्रधानसम्पादकः

सत्प्रेरणानाटकम्

प्रणेता
डा० इच्छाराम द्विवेदी "प्रणवः"

पात्र-परिचयः

पुरुषाः	स्त्रियः
१. कविशेखरः (नायकः)	१. प्रेरणा (नायिका)
२. वृत्तोदरः (नायकस्य सखा)	२. अपराजिता (प्रेरणायाः सखी)
३. सूत्रधारः (सूत्रधारः)	३. चञ्चला (प्रेरणायाः सखी)
४. नटः (नटः)	
५. पुरुषः (नायिकायाः पिता)	
६. विद्याधरः (नायकस्य गुरुः)	
७. रसामृतः (नायकस्य सखा)	

अस्ति किञ्चिद् वाचिकम्

शास्त्राम्भोधिजले तरंगतरले विद्याप्रभाचञ्चले,
प्रोत्फुल्लाब्जवरे सुवर्णमधुरे ज्ञानच्छटाबन्धुरे।
वीणावादनमेदुरामतितरामुल्लासभूतिप्रदां,
श्रेय:प्रेयधरां प्रसन्नवदनां वाग्देवतामाश्रये।।

अये सुरभारतीसमाराधनतत्परा:! सततसारस्वतसपर्यासमुत्सुकोऽयं प्रणवस्तत्रभवतां करसरोरुहयो: समर्पयन्निमां सत्प्रेरणानाटकाख्यामभिनवां कलिकाममन्दमानन्दमनुभवति। नाटकमिदमकस्मादेव लेखनीऽतीर्थे ऽवतरितं वाग्देवताया राजहंस इव। तस्य कलस्वनं यदि कुत्रचिदपि नाटकेऽस्मिन् समनुभविष्यन्ति सचेतसस्तर्हि सफलताकन्दलितामात्मवाचं मन्ये।

नाटकेऽस्मिन् पञ्चाङ्काः संकल्पिताः। यत्र मुख - प्रतिमुख - गर्भ - विमर्श -निर्वहणादीनां शास्त्रनियमानामनुरोधो नाक्षरश: परिपालितस्तथापि रसपरिपाकाश्रयिणी कृति: सतां मोदाय भवतीति कृत्वा नाटकमिदं विरचितम्।

श्रृंगारोऽत्र मुख्यो रस:। यथाकालं यथास्थानमन्येऽपि रसा: कथावस्तुनोऽनुरोधादागता न पुन: पाण्डित्यप्रदर्शनधिया। अभिनेयता स्यादिति लक्ष्यमंगीकृत्य रचनायामस्यां घटनासंघटनं प्रायश: द्वित्रिभिर्वा स्थलैरेव संघटितम्। कथावस्तु कविकल्पितम्। केवलं भावसंयोजनं कवे: स्वकीयम्।अनुदिनमनुरागव्याधिनिपीडिता न जाने कियन्तो युवान: युवत्यश्च प्रेम्णि विफलत्वमनुभूय म्रियन्ते, हतोत्साहिनो जायन्ते, जीवन-संग्रामात्पलायन्ते च। एतादृशाणामेव यूनां कृते सर्वथा नूतनमाशाद्वार-

मुद्घाटयितुमस्य सत्प्रेरणानाटकस्य रचना जाता। यदि कदाचित् क्वचित् केनचिद् वा किञ्चिदपि मतानुमोदनमस्य स्वीकृतं तर्हि महतीह सफलताऽस्य स्यादिति तर्कये।

अस्या:प्रकाशनार्थं देववाणी-परिषदो महासचिवा अस्माकं काव्यगुरव: श्रीमन्तो डॉ० रमाकान्तशुक्लमहाभागा: सहर्षं सन्नद्धा अभूवन्नतस्तेषामाशिषं शिरसा वहन्नयं प्रणव: पुरुषोत्तमाँस्तान् पौन: पुन्येन प्रणमति। अथ च सनातनमहाकविभ्यो डॉ. रेवाप्रसाद द्विवेद महोदयेभ्य: कृतिमिमां सादरं समर्पयति।

गंगादशहरा सं. २०५० वै०
"श्वेतद्वीपम्"
सुरभारती सेवा संस्थानम्,
167/12 पंजाबी कालोनी
मैनपुरी (उ.प्र.) 205001

विदुषामाश्रव:
"प्रणव:" इच्छाराम द्विवेदी

प्रथमोऽङ्कः

(नान्दी)

वासन्ते समयेऽबलाबलधरं धीरत्वविध्वंसकं,
चण्डज्वालहुताशनै रतिपतिं क्षारं क्षणे नीतवान्।
पश्चाच्छैलसुताकटाक्षविनतो रागारुणः कारुणः,
प्रेमानन्दपरश्शिवश्शशिनिभश्शान्तश्शिवायास्तु वः।१।

अपि च

या त्रैगुण्यसुता सदंकभवने संलालिता भावुकैः,
भावोल्लासविवर्द्धिनी सुखकरी लोकाजिरे राजते।?
क्रीडन्ती कविवैखरीशुकरवैर्वाग्देवतादेशतः
प्रीत्यै सास्तु सतामियं गुणमयी सत्प्रेरणा सर्वदा।।२।।

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्र– साधु नान्दीपाठक! साधु। शोभनन्त्वयोदीरितम्। एतादृश्येव भवति सत्प्रेरणा; किन्तु कामक्रोधादिशत्रुजनदूषिते लोभमोहेर्ष्यादिभुजंगभूषिते क्षणचञ्चले मानवे प्रायशो ऽसुलभैव भवतीदृशी सत्प्रेरणा। तथापि निखिलजीवलोक शंकरस्य भगवतश्चन्द्रशेखरस्य कृपया कदाचित्क्वचित् कस्मैचिदपि सुलभा संजायते चेत् तदा धन्यो भवति स वराकः। क्व पुनरस्माकं सौभाग्यमीदृशम्! अस्तु तावत्। भाव! भाव! (इति नटमाकारयति)

(ततः प्रविशति नटः)

नटः- (प्रणम्य) आर्य! अयमहं समुपस्थितः! आदिशतु भवान्। को नियोगः?

सूत्र०- भाव! कुत्रास्ते साम्प्रतं मे प्रेरणाभूता ते स्वामिनी?

नट:- आर्य! प्रदोषवेलेयम्। प्रत्यहं स्वामिनी स्वेष्टदेवं भगवन्तं शशांकशेखरं समभ्यर्चितुं मन्दाकिनीतीरं यात्येव। तर्हि मन्ये पूजनव्यापारासक्तया तत्रभवत्या भाव्यम्।

सूत्र०:- भाव! मया सा प्रात:काल एव प्रतिबोधिता यदद्य खलु सर्वविदसारभूतस्येव सर्वजनहृदयवल्लभस्य श्रीमत्प्रणवस्य कवेर्नव्यं नाटकं समुपस्थाप्यमार्यमिश्राणां समक्षम्। तत्कथं चिरायते तत्रभवती। गच्छ निवेदय तत्रभवतीं शीघ्रता-सम्पादनाय।

नट:- यथाज्ञापयति भवान्। (इति निष्क्रान्त:)

सूत्र०- अये आर्यमिश्रा:! भवन्त्येवास्माकं समेषां गृहे प्रायश एवैतादृश्य: प्रेरणास्पदास्तत्रभवत्य: श्रीमत्य:। मया तु प्रातरेव सा प्रतिबोधिताऽऽसीत् किन्तु तत्रभवत्या तथापि शैथिल्यं कृतं नाट्यसंविधानके।

(इतस्तत: पर्यटन् पौन:पुन्येन घटीयन्त्रं चावलोक्य)

कथमधुनापि नागता? (आत्मगतम्) किं करोमि! (प्रकाशम्) आधुनिका सेवका अपि नाम निष्कर्मिणो वर्तन्ते। अस्माभि: प्रेषित: स नटोऽपि नागत: सूचनार्थं तर्हि स्वयमेव गच्छामि तामन्वेष्टुम्। कदाचिदियं मन्दाकिनीतीरगते शिवायतने संस्था भवेत्तदा शिवदर्शनेन साकं प्रियादर्शनमपि स्यात्। (इति निष्क्रान्त:)

(तत: प्रविशति मन्दाकिनीतीरस्थं मन्दिरं प्रति गच्छन्ती नायिका प्रेरणा तस्या: सख्यौ च)

अपराजिता- इत इत: प्रियसखि!

प्रेरणा- अपराजिते! अद्भुतेयं प्रदोषवेला। अस्ताचलगामिनो भगवतो

मरीचिमालिन आरक्तविभाविभासिता कान्तिमयी चञ्चद्धिम-शिखरमुकुटाभरणालंकृता कूजद्विहंगमनूपुरनिक्वाणझंकृता नायिकेव द्रुतमायाति प्रदोषवेला।

अपरा-- एवमेतत् सखि!

चंचला- हला एवमेतत्! पश्य—

आरक्ताधरसहिता रागारुणा च तरला नयनाभ्याम्।
कूजन्नूपुरविहगा त्वामनुयाति प्रदोषवेलेयम्।।३।।

प्रेरणा-- (विहस्य) चञ्चलासि त्वम्। सुष्ठु भणितम्।

अपरा॰-- शीघ्रमेहि प्रियसखि! शिवदर्शनानन्तरं गमनीयमप्यस्ति। (इति त्वरितगतिं नाटयति) इदं देवतायतनम्। प्रविशतु प्रिय सखि! स्वेष्टदेवता प्रसादनार्थम्।

प्रेरणा- (प्रवेशं नाटयन्ती निमित्तं निरूप्य) कथमत्र वामाक्षिस्पन्दनं नाम। प्रियतमजनदर्शनसूचकमिदं कथमिहापतितम्। अथवा कृतं सन्देहेन—

जीवने तु निमित्तानि जायन्ते यत्र कुत्रचित्।
शिवमेव भवेत्सर्वं साम्प्रतं शिवसन्निधौ।।४।।

(नेपथ्यात्)

भवानीधम्मिल्लारुणसरससिन्दूरकलया,
तथा रागासक्त्यारुणतरलसौन्दर्यमधुरम्।
हृदि प्रेमज्योत्स्नारुणकिरणविस्तारसहितं
शिवं श्वेतं वन्दे करुणमरुणाभं प्रियतमम्।।५।।

प्रेरणा-- (आकर्ण्य) कस्येदं नवलजलधरनिर्घोषमोषको गभीरमृदुरवः।

सख्यौ-- हला! अश्रुतपूर्वमेवैतत् स्वरसन्धानम्?

प्रेरणा-- तर्हि मन्दिरं प्रविश्य पश्यामस्तावत्।

(सर्वा मन्दिरं प्रविश्य स्तम्भपार्श्वे संस्थिताः पश्यन्ति)

(ततः प्रविशति शिवमाराधयन् मन्दिरस्य गर्भगेहे किञ्चिदन्धकारिते स्थाने तिष्ठन् नायकः कविशेखरः)

प्रेरणा- (आत्मगतम्) को नु खल्वयं देवोपमः स्मर इव मूर्तिमान् भक्तिविनतः शिवसद्मनि प्रविष्टः?

कवि॰- (मीलितनयन एव) वृत्तोदर! पुष्पाणि तावत्। (शिवं ध्यायन्नेव पुष्पाण्यादातुं हस्तं प्रसारयति। प्रेरणा कमप्यन्यं तत्र न दृष्ट्वा तस्य हस्ते स्वयं पुष्पाणि ददाति)

(पुष्पाञ्जलिं समर्प्य)–

जनमनोरथपूरक! देव! ते
पदयुगे सुमनोऽञ्जलिरेष मे।
भवतु चन्द्रधराय सुखावहो
मम मनोरथपूरणकर्मणि।।६।।

(भक्त्या प्रणमति। प्रेरणापि प्रणामं नाटयति। प्रणामानन्तरं वृत्तोदरोऽयमिति मत्वा प्रेरणायाः हस्तमाकर्षन्)

एहि सखे! निवृत्ता शिवोपासना। आवां गच्छावः।

(प्रेरणा स्पर्शमनुभूय लज्जया स्वहस्तमाकर्षति)

कवि॰- सखे! कथं चिरायते ऽत्रभवान्। किं शिवाभिषेकार्थं पुष्पावचयादेव श्रान्तोऽत्रभवान्।

(पुनः हस्तमाकृष्य बहिरानयति। मन्दिरस्य द्वारदेशमागत्य तत्र प्रेरणां दृष्ट्वा सम्भ्रान्तः सन्)–क्षम्यतां क्षम्यतां देवि वृत्तोदरो मे सखा। तस्य व्याजेनाहमत्रभवत्या पाणिग्रहणं कृतवानस्मि।

चञ्चला- किमुच्यते पाणिग्रहणमिति?

कवि॰- (अर्थं परिज्ञाय जिह्वां दन्तैर्हस्ताभ्यां कर्णौ स्पृष्ट्वा) सम्भ्रमात् बुद्धिरपि मे व्याकुलिता देवि। यन्मया सम्भ्रमवशात् कथितं

तदपि क्षम्यताम्। (इति बद्धाञ्जलिः प्रणमति)

(प्रेरणा साध्वसादवचना तिष्ठति)

सख्यौ- (मन्दस्मितं कृत्वा) यदत्रभवता सम्भ्रमवशात्कथितं तन्मन्ये शिवानुज्ञातमेव।

(वाक्यं श्रुत्वा प्रेरणा तर्जनीं दर्शयन्ती सख्यौ वर्जयति)

कवि०- देव्यः! क्षम्यतां क्षम्यतां युष्माभिः। न मयौद्धत्येन तत्कर्म सम्पादितम्। अन्धकारेण प्रणष्टचक्षुषा मया तादृशं दुःस्साहसं कृतम्। धिक् कष्टम्-

हिताहितप्रेक्षणमूढवृत्तिम्
प्रणष्टविज्ञानविवेकचारम्।
समस्तपापैकनिवासभूतं
जुगुप्सितं तन्तु धिगन्धकारम्।।७।।

अतः क्षम्यतामत्रभवत्या।

अपरा- सखि! क्षमायाचनं कुर्वत एते महानुभावाः। तर्हि किमपि प्रतिवचनीयन्त्वया।

प्रेरणा- नात्रभवद्भिः सज्ञानेनेदं कृतमत एव नास्त्यवकाशः क्षमायाः।

कवि०- देवि!

सज्ञानैर्वा तथाऽज्ञानैर्यत्कृतं कर्म मानवैः।
नूनं फलति लोकेऽस्मिन्नतस्त्वं क्षन्तुमर्हसि।।८।।

चञ्चला- (सव्यंग्यम्) सखि! विना क्षमादानेन न कृतकृत्या भविष्यन्ति महानुभावा इमे। अतः क्षमस्वैतान्।

(प्रेरणा न किञ्चिद् वदति)

कवि०- सुष्ठु भणितमत्रभवत्या। यदीयमत्रभवत्योः प्रियसखी न क्षमादानं करिष्यति तदावश्यमेवानुचितस्पर्शपातकभारेण दुःखितं मे हृदयं भविष्यति।

चंचला– (सभ्रूभंगम्) तर्हि किमस्माकं प्रियसख्याः स्पर्शं पातकं मन्यन्ते भवन्तः?

कवि०– (कर्णौ पिधाय) शान्तं पापम्। शान्तं पापम्। कथमेतत् सम्भाव्यते–

सुधासारस्नाता मलयगिरिजातातिविशदा,
सुगन्धव्यापारप्रसरणविधौ लोकमहिता।
शिवा शीतस्पर्शा सुरमुनिजनैर्भालनिहिता
सदा स्पृष्टा पुण्यं जनयति जने चन्दनता।।१।।

किन्त्वज्ञानतो मया यत्कृतं तदप्यनुचितमेव। तस्मात्पौनः पुन्येन क्षमायाचनं क्रियत इति। (प्रेरणा स्वप्रशंसां श्रुत्वा नतनयनाऽऽरक्तकपोला सती तिष्ठति)

चंचला– सखि! अवश्यं क्षन्तव्या इमे महानुभावाः। ततः स्वयं क्षमादानं कुरु।

अपरा०– आर्याः! मन्येऽत्रभवन्तं चन्दनयज्ञोपवीतादिभूषितं वीक्ष्य विप्रकुलभूषणं मत्वा क्षमादानेनाऽऽत्मानमपराधिनीं कर्तुं नेच्छति प्रियसखी। अतः स्वपरिचयस्तावद् दीयताम्।

प्रेरणा– (आत्मगतम्) शान्तं भव हृदय! तवैव जिज्ञासां शमयति सखी अपराजिता।

कवि०– तीर्थदर्शनव्यसनिनो वयं भगवन्तं बदरिकेश्वरं समभ्यर्चितुं प्रयाता इन्द्रप्रस्थात्। अद्य ज्योतिष्पीठे मध्ये यात्रां तिष्ठद्भिरस्माभिर्भगवता तोटकाचार्येण संस्थापितस्य त्रिभुवनगुरोस्तोटकेश्वरस्य स्फटिकमूर्तेर्दर्शनं करणीयमिति निश्चित्य वयमत्रागताः। वृत्तोदरोऽस्माकं सखाऽभिषेकपूजार्थं पुष्पाण्यादातुं गतवानासीत्। ध्यानावस्थितैरस्माभिर्न तस्य स्थानेऽत्रभवत्योः प्रियसख्या आगमनं परिलक्षितम्।

अपरा— अग्रिमं सर्वं दृष्टचरमेव । आर्य! कान्यक्षराणि शोभितान्यत्रभवतां नाम्ना?

कवि०— देवि! कविशेखराख्यं मामाकारयति लोकः ।

चंचला— अत एवैतादृशैश्चतुरैर्वाक्यविन्यासैः क्षमायाचनं कृत-मत्रभवद्भिः । कवयो भवन्त्येव वाक्चातुरीधुरीणाः ।

(प्रेरणा चंचलां कुपितेवालोकयति)

अपरा— इयमस्मत्सखी चञ्चला नाम्नी बहुलालापिनी, ततः क्षन्तव्येयम् । आर्याः! किचित्प्रष्टुकामा इव संलक्ष्यन्ते?

कवि०— अथ किम्? अत्रभवतीभि रस्मद्गतं सर्वं पृष्टं न किञ्चिदात्मगतं निवेदितम् । तस्माच्द्रवणीयं श्रोतुमिच्छामि ।

चंचला— (कविशेखरं प्रेरणाञ्च निरूप्य) आर्य! आत्मगतन्तु निवेदनीयं भवति रहस्येव न पुनः सखीजनसम्मर्दे ।

कवि— (विहस्य) सार्थनामाऽत्रभवती विराजते ।

अपरा— आर्याः! वयमपि तस्मादेव देशात् तस्मादेव कारणाच्च निर्गता यस्मादत्रभवन्त इहायाताः । इयमस्माकं प्रियसखी प्रेरणा । इयमपरा चंचला । अहन्तु नाम्ना अपराजिता किन्तु साम्प्रतमत्रभवतां तेजसा पराजिता ।

(अपटीक्षेपेण प्रविश्य)

वृत्तोदरः— (ससम्भ्रमम्) सावधाना भवन्तु । सावधाना भवन्तु ।

कवि— सखे! वृत्तोदर! किमभूत्?

वृत्तोदरः- किमपि नाभूत् । किन्तु यद्यत्रैव स्थास्यसि तदा भविष्यत्येव ।

कवि— किं भविष्यत्येव?

वृत्तोदरः- प्रदोषव्रतक्षुधितेन सघनकानननिर्गतेन मृगेन्द्रेण पारणक्रमे ऽस्माकं भक्षणं करिष्यते ।

(कन्यकाः भयोद्विग्ना भवन्ति । सर्वे गमनं नाटयन्ति)

कवि०– न भेतव्यम्। न भेतव्यम्। सन्नद्धा वयमत्रभवतीनां संरक्षणार्थम्।

वृत्तोदर:- हं! सन्नद्धा वयम्। किं करिष्यसि प्रियवयस्य! मृगेन्द्र आयाते सति?

कवि०– वीररसविजृम्भितेन काव्येन तं धर्षयिष्याम:।

(सर्वे हसन्ति)

नतोन्नतेऽस्मिन् भूभागे सावधानतया गन्तव्यमत्रभवतीभि:।

(प्रेरणा गमनबाधां रूपयन्ती पादभ्रष्टा पतति कविशेखरं विलोकयन्ती। कविशेखर: स्वभुजं प्रसार्य तां गृहीत्वा स्थापयति। स्पर्शसुखमभिनीय)

(आत्मगतम्)–

द्रुतं गच्छन्तीयं स्खलितपदपंक्त्या यदपतन्,
ममैवोर:प्रान्ते चलभुजलताश्लेषसहिता।
मया मध्ये बाहुं सुदृढतरमारोपणविधौ,
धृता तन्मन्येऽहं कुसुमितलतोद्धारणमिव।।१०।।

कवि०– कथं स्खलितात्रभवती? पूर्वमेवास्माभिर्निवेदितमासीद्यत् सावधानतया गन्तव्यमिति।

प्रेरणा– (पीडां रूपयन्ती) सख्यौ प्रतीक्षेथां माम् पाषाणशिलाभ्रष्टाहं पादपीडयाऽसमर्थास्मि त्वरितगमने।

सख्यौ– (परिवर्त्यावलोकयत:) दिष्ट्यार्यैर्गृहीतासि।

(शनै: शनै: सञ्चरन्त: सर्वे शिविरसन्निवेशं प्राप्नुवन्ति)

कवि– गच्छन्त्वत्रभवत्य: पुनर्दर्शनाय।

सख्यौ– अत्रभवानपि।

(कविशेखर: प्रेरणा च परस्परं सतृष्णं विलोकयन्तौ निष्क्रमेते)

।। इति प्रथमोऽक: ।।

द्वितीयोऽङ्कः

वृत्तोदरः अहह! विचित्रोऽयमनुरागव्याधिर्यस्मिन् तदेव भवति निदानमौषधञ्च वस्तु यद्रोगोत्पादकं भवति। पश्यन्तु तावदार्यमिश्राः! या सकलकुलजातिधर्मादिसद्गुणमोषणी, दृष्टिव्यापारैकमात्रजोषणी, धीरता-स्रोतस्विनीशोषणी, प्रचण्डमोहानलपोषणी, नेत्र-सम्मिलनोद्भूता, रागपाशविजृम्भिता कटाक्षकृपा भवति सैव पौनःपुन्येनान्विष्यते कामिजनैः। या खलु स्पृष्टा सती विषममोहविषमूर्च्छाविसर्पिणी सर्पिणीवाकण्ठलग्ना जायते सैव शीतस्पर्शधारिणी चन्दनलतेव मृग्यते भुजलता। किं बहुना—

समस्तसद्धर्मविनाशदक्षः, विमोहविस्तारणबद्धकक्षः।
स मन्मथो यस्य भवेद्विपक्षः न तस्य लोकेषु कुतोऽपि रक्षा।।१।।

(अन्यतो गत्वा)

अमुमेव मे मित्रप्रवरं कविशेखरमवलोकयन्तु भवन्तः! धर्मसम्पादनार्थं समायातेनानेन मध्येमार्गमेव विपत्तिरासादिता प्रीतिव्यापाररूपा। ताञ्च प्राप्य हतधैर्योऽयं सकलामेव रात्रिं प्रजागरकषायितामनैषीत्। प्रातरेवोत्थाय कुतोऽपि निर्यातो मां सुप्तमेव विहाय। साम्प्रतं तमेव मार्गयामि। कुतो नु खलु गतो भवेत्? (अन्यतो गत्वा) इतोऽपि नास्ति। (अपरतो गत्वा) किम्? इतोऽपि नास्ति। (चिन्तयन्निव) कदाचित्तस्मिन्नेव शिवायतने स्थितो भवेत् यस्मिन्सा विपत्तिरवाप्ता। अस्तु! तत्रैव गच्छामि। (इति निष्क्रान्तः)

(ततः प्रविशति मन्दिरस्थः कविशेखरः)

कवि०— किमिदमारब्धं मया? सर्वथाऽनौचित्यपूर्णमार्यजनविनिन्दितञ्च शंकरस्य भगवतश्शंकरस्य मन्दिरादेव प्राप्ता महती साऽशान्तिः।

पुण्यायां प्रदोषवेलायां प्रारब्धाऽपवित्रा दोषखेला। शीताकरात् हिमालयादेव प्राप्ता प्रचण्डदाहज्वाला। किमहं करवाणि? अथवा कः समर्थः कामव्याधिं शमयितुं कामारिं भगवन्तं शिवं विना। अतो अमुमेव करुणावतारमभ्यर्थये– (बद्धाञ्जलिः सन् पठति)–

त्वत्पादाब्जकृपाप्रसाधनविधौ यात्रा कृतेयं मया,
मध्ये मार्गमितस्तवैव रिपुणा संधर्षितोऽहं कथम्?
दृष्ट्वा भक्तममुं विपत्तिविकलं ब्रूषे न यत्त्वं विभो!
तन्मन्ये मरणं ममैव शरणं लोकेऽधुना केवलम् ।।२।।

अथवा किमनेन परिदेवितेन? मन्ये यत्त्वयैव समारब्धोऽयं प्रीतिपाशो यतो हि पशुपतिरसि, पशूनां बन्धनाय पाशरचनाञ्च जानासि। त्वयैव लीलया विरचिता सा वल्लभा–

सितं गांगं फेनं विलसति तदीये सुहसिते,
दृशोः स्वच्छा कान्तिः कलितविभवाऽऽस्ते नयनयोः।
कला चान्द्री रम्या विमलवदने यास्ति मधुरा
सुधामाधत्ते सा रतिसुखकरे स्वाधरपुटे ।।३।।

अथ च

दहज्ज्वालातापो नयनयुगलेऽवाप्तमनया,
ततः सन्तप्तोऽहं विकलकरणोऽस्मीत्यविरतम्।
सुधादानं मह्यं यदि न मिलितं हे पशुपते!
कथाशेषं यास्ये तव भवनदेशे क्षणमिदम् ।।४।।

(इति. शनैः शिवसन्निधाने शिरः स्थापयति)

(नेपथ्यात् किंकिणीध्वनिः श्रूयते)

कवि० अये! कुतोऽयं भगवतः कामस्य रथध्वनिरिव पादकिंकिणी-निक्वणं श्रूयते। पश्यामस्तावत्–(इति कथयित्वाऽऽत्मानं

मन्दिरप्राचीरसन्निधावाच्छाद्यावलोकयति) अये! विभो! तव कृपया समायाति सैव मे प्रिया। भवतु। द्रक्ष्याम्यन्तरित एव। (इति तिष्ठति)

(ततः प्रविशति विवर्णा प्रेरणा सख्यौ च)

अपरा०– सखि! अस्वस्थासि किम्? यदद्य प्रभातादेव त्वां खिन्नामिवालक्षयामि।

चंचला– अथ किम्, हस्तिहस्तपरामृष्टा कमलिनीवालक्ष्यते प्रियसखी–

कर्णान्तविस्तृत इमे नयनेऽरुणाभे,
रात्रिप्रजागरविपत्तिभरं सहेते।
पीताभमाननमिदं विरसाधरोष्ठं
निःश्वासराहुगिलितेन्दुनिभं विभाति।।५।।

अपरा०– तर्हि किं कारणमस्याः विपत्तेः?

चंचला– (अपवार्य) ह्यः सायंकालादेव तं कविवरेण्यं दृष्ट्वा संजातैवं विधेति मन्ये। अस्तु तावदिमामेव पृच्छामि।

(प्रकाशम्)– हला! कथय किमर्थमायासितासि? रात्रावपि न त्वया गृहीतं निकाममशनं न वा सुखेन शयितं तत्किं कारणम्? किञ्चिज्ज्वरादिकं विद्यते?

प्रेरणा– नहि नहि चंचले! नास्ति ज्वरः।

चंचला– तर्हि कथं विवर्णेव प्रतीयसे?

प्रेरणा– न जाने प्रियसख्यौ। नैतादृश आयासो मयानुभूतपूर्वः। ह्यः सायंकालादेवानीशास्मि संवृत्ता गात्राणाम्। न मेऽङ्गानि प्रभवन्ति कार्येषु। अहेतुक एव वेपथुर्जायते मम शरीरे। तथा हि–

सुचिन्तितमपि क्षणं प्रयाति विस्मृतिपथं,
सुधृतमपि दृढं पदं वेपते भृशं भूतले।
सुमिष्टमशनादिकं विभाति मम नीरसं,
सुखासनमपि प्रियं कंटकान्वितं भाति मे ।।६।।

अपरा०- (जनान्तिकम्) ईदृशी दशा कदा भवति हला?

चंचला- श्रूयते कोऽपि प्रीतिव्याधिः गाथासु यस्मिन्नीदृशान्येव लक्षणानि प्रादुर्भवन्ति। तर्हि किमियमस्माकं प्रियसखी प्रीतिरोगेण गृहीता। (प्रकाशम्) सखि! यादृशानि लक्षणानि त्वया वर्णितानि तानि तु प्रीतिव्यापारासक्तचेतसां भवन्ति। तर्हि स्पष्टं भण किञ्चित्?

प्रेरणा- (स्वगतम्) किमधुना करोमि मन्दभाग्या? किं निवेदयामि प्रियसख्यौ? उताहो सर्वं विरहव्यथाविषमात्मन्येवाच्छाद्य तिष्ठामि? मन्ये स्वेष्टजननिवेदिता व्यथाल्पभारा भवति; तर्हि विश्वासभाजनं जनं प्रति कथने न कोऽपि दोषः। (निःश्वस्य प्रकाशम्) सखी यदाप्रभृति नवलजीमूतनिर्घोषधरो मे नयनातिथिर्जातस्तदाप्रभृत्येवेयं ममावस्था। न पारयेऽहमेकाकिनी कामाब्धिमेतं तरीतुम्।

अपरा०- तर्हि किं करणीयमधुना?

चंचला- किमन्यत्? स शिव एवाभ्यर्थनीयो यस्यायतने रागांकुरोऽयमेकयैव रात्र्या एतादृशः प्रवृद्धः।

अपरा०- युक्तं कथितं त्वया। सखि तत्रैव गम्यताम्।

चंचला- कथमियं गमिष्यति? सर्वथाऽसमर्थेयमुपलविषमे देशे गन्तुमधुना।

अपरा०- तर्हि किं करणीयम्?

चंचला- अहमेवात्रभवत्याः प्रार्थनां शिवसन्निधौ नेष्यामि।

अपरा०– तर्हि कथयतु प्रियसखी का प्रार्थना निवेदनीया चंचलया?

प्रेरणा– नास्ति पूर्वानुभूतोऽयं व्यापारस्तर्हि कैश्शब्दैरात्मनिवेदनं करणीयमिति न जाने। (किमपि चिन्तयित्वा) श्रृणुतं प्रियसख्यौ–

निखिलभुवनवन्द्य! द्वारदेशे त्वदीये,
निशितमदनबाणैर्या दशा मेऽद्य जाता।
मदनदहन! देव! क्वासि कारुण्यमूर्त्ते!?
वरद! कथय किन्त्वं तां न दूरीकरोषि।।७।।

अपि च–

मम हृदयसरोजे कान्तरूपः प्रियो मे
तव करुणकटाक्षैरेव लब्धावकाशः
यदि न भवति चैतत्तर्हि नो त्वत्समक्षं
कथय कुसुमबाणैर्हन्ति कामः कथं माम्।।८।।

कवि०– (स्वगतम्) अहह! पूर्णोऽयं प्रणयः साम्प्रतं यदुभयत्रापि प्रीतिमभिवर्द्धयति। सत्यम्–

यावत्कान्ताहृदयकमलस्यानुरागव्यथां नो,
जानन्तीमे प्रणयविकला नो लभन्ते सुखन्ते।
ज्ञात्वा भावं द्विगुणिततरां प्रीतिभाजो भवन्ति,
द्वैतेऽद्वैतं सुलभमथ चेत् को न हृष्येद्भवेऽस्मिन्।।९।।

तर्हि प्रतिपालयामस्तावत् प्रियायाः प्रियसख्या आगमनम्।

(ततः प्रविशति चंचला, बद्धाञ्जलिः सती शिवं प्रार्थयति)

चंचला– हे देव! संसारे सर्वो हि जनः स्व प्रकृतिसदृशं चेष्टते तथापि विभुरसि सर्वस्य जगतस्त्वमेव। तर्हि रक्ष मम प्रियसख्याः जीवनं प्रणयञ्च (इति प्रणमति)

(नेपथ्यात्)

व्यवसितमपि जाने बालिके ते नु सख्याः,
अयमतुलविनोदः कल्पतो मे प्रवृत्तः ।
मम शरणगतैषा प्राप्स्यते स्वं प्रियं सा
यदि परिजनहीनायास्यति क्षिप्रमत्र ।।१०।।

(श्रुत्वा सहर्षं प्रणम्य) विभो! कृतार्थीकृता मे प्रियसखी। अनुजानीहि मां तस्याः प्रतिबोधनाय। (इति निष्क्रान्ता)

(ततः प्रविशति सभया सलज्जा सश्रद्धा चैकाकिनी प्रेरणा)

प्रेरणा— भगवन्! महेश्वर! देवि! जगदम्बिके! किं वच्मि? लज्जया वागेव मे न प्रवतति प्रार्थनायाम्। अथ च सर्वजनहृदयसन्निविष्टाः सन्ति भवन्तोऽतः किं वा प्रार्थनया? तदपि याचे—

('निखिल भुवनवंन्द्य' इत्यादि पुनः पठति। कविशेखरः स्वहस्तात् तस्याः शिरसि पुष्पवृष्टिं करोति। पुष्पवर्षणं विलोक्य उन्नमितैकभ्रूलता सा साध्वसात् प्रकम्पिता सती स्वयमुत्थातुमिच्छति। कविशेखरस्तां स्वभुजयोर्गृहीत्वोत्थापयति)

कवि०— सुमुखि! सफलास्ते प्रार्थनाः। पूर्णा अस्माकं मनोरथाः भगवतश्चन्द्रशेखरस्य कृपया—

वैकुण्ठार्थमितो गतेन सरले मध्येपथं यन्मया,
त्वं प्राप्तासि शिवप्रसादमधुरा सर्वार्थसिद्धिप्रदा।
तन्मन्ये करुणावतारकृपया नौ संगमः कल्पितः,
तस्मादेहि सखे! समर्चनविधिं शर्वाय कुर्मो वयम्।।११।।

(शनैस्तामालिंगितुमिच्छति)

प्रेरणा— (अपवारयन्ती) आर्य! आर्यपुत्र! रक्ष! रक्ष विनयम्!

कवि०— किमविनीतं मया शुभे?

कामव्याधिनिदाघतप्तमनसा शुष्के प्रतप्तेऽधरे,
पीयूषद्रवबिन्दुसेचनविधौ कुर्यास्त्वमेवं यदि।
नूनं तर्हि निपातितैव भविता मे जीवनाशालता
के जीवन्ति धरातले वद शुभे! लोके सुधावर्जिताः।।१२।।

(प्रेरणा स्वकरेण तस्य मुखमाच्छाद्य)

प्रेरणा— मैवं ब्रूहि प्राण! सर्वं तवायत्तमधुना तथापि प्राक्तनसंस्कारवशात् देवतासान्निध्यभयाच्च वेपते मे मनः। पश्य—

वाञ्छास्ति ते प्रणयपाशसमाश्रयस्य,
चित्तन्तथापि विकलं परिवेपते मे।
इन्दुं विलोक्य सहसा प्रणयी चकोरः,
पर्युत्सुको भवति किं? नहि कान्त जाने।।१३।।

कवि०— प्रिये! तरंगिते समुद्र एवोच्छलन्ति रत्नानि। शान्ते तु पुनः गह्वरायन्ते—

उत्तरंगायिते नूनं सागरे रत्नराशयः।
तटमायान्ति हर्षेण मुष्टिकीर्णवसुप्रभाः।।१४।।

(शनैः प्रेरणाया हस्तं करे गृहीत्वा बहिरागत्य शिलातलं चोपवेश्य) प्रेरणे! विचित्रोऽयमनुरागो यः खलु दृष्टिनिक्षेपमात्रेणैवं जीवनं संकटे निक्षिपति।

प्रेरणा— (निःश्वस्य) सत्यमेवार्य! यदाप्रभृति भवान् मम दृष्टिपथमायातस्तदाप्रभृत्येव जलनिष्कासिता शफरीवाहं संजाता। न जाने कथं मम हृदयसन्निविष्टो जातोऽत्र भवान्?

कवि०— (विहस्य) अलीकं वदसि प्रिये!

प्रेरणा— (सभयम्) अलीकं कथमिव?

कवि०— पश्य—

व्यर्थं ब्रूषे किमर्थं सुतनु! ननु ममाश्वासनार्थं क्षणेऽस्मिन्,
यत्तेऽहं संवसामि प्रणयपरिगतः सर्वदा हृत्सरोजे।
यत्रास्ते नावकाशः खलु सघनतया स्वल्पसूत्रं प्रवेष्टुं,
तत्रैवाहं कथं स्यां सुकुचकलशयोर्मध्यवर्त्ती प्रिये ते।।१५।।

(प्रेरणाऽऽरक्तवदना सती प्रणयकोपेन तं भर्त्सयति। कविशेखरो हस्तं जिघृक्षति तावत् सख्यौ प्रविशतः)

कवि०— (दृष्ट्वा) स्वागतमत्रभवत्योः।

सख्यौ— आर्य! नमस्ते।

कवि०— नमो युवाभ्याम्। देव्यौ! इदमासनम्।

(उभे उपविशतः।)

अपरा०— आर्याः! कदाऽत्रभवन्त इहायाताः?

चंचला— आर्यास्तु रात्रावप्यत्रैवासन्निति तर्कये यतो हि रागारुण इव प्रजागरारुणे नयने प्रमाणभूते स्त आर्याणाम्।

अपरा०— चंचले। किमर्थमुपहससि आर्यान्।

चंचला— क्षम्यताम्। न मयोपहसितम्। किन्त्वार्यस्यागमनमार्गं न मया लक्षितं तर्हि आकाशमार्गादिवावतरितान् आर्यान् मन्ये। किमार्याः?

(कविशेखरः किञ्चिल्लज्जितो भवति।)

कवि०— देवि! सर्वं जानाति प्रियसखी चंचला। न किमप्यत्रास्ति गोप्यम्।

अपरा०— इयमस्माकं प्रियसखी प्रेरणा प्रकृतिसुकुमारा सर्वशा रक्षणीया।

कवि०— किमहं वच्मि देवि। इयन्ते प्रियसखी द्वितीयं मे हृदयम्। इयन्तु कवेः कामायनी। पश्य-

रम्या राजीवरेखा सुनयनयुगले चापलेखा भ्रुकुट्योः,
निःस्तब्धो रत्नकीरः नसि विनतमुखो रक्तबिम्बाधरोष्ठे।
मुक्ताभा दन्तशोभा श्रुतिरमणकरौ स्वर्णकर्णावतंसौ,
आयाताऽऽरामरम्या मनसिजमधुरा कापि कामायनीयम्।।१६।।

अपि च–

मांगल्ये द्वारदेशे ललितभुजलते पल्लवानन्दपूर्णे,
कौशेयैर्बद्धकण्ठा कुचकलशघटीदोस्तटी पार्श्वदिशे।
मध्ये कामाजिराभं कलयति सुकलां स्वस्तिकं मन्मथस्य,
नव्या भव्यातिदिव्या प्रतिपलंमधुरा कापि कामायनीयम्।।१७।।

चंचला– तर्हि सार्थां पठन्त्वार्याः कामायनीमिमाम्। एह्यपराजिते! गच्छावस्तावत्।

प्रेरणा– कुत्र गच्छथः प्रियसख्यौ! अहमत्रैकाकिनी।

अपरा– कथमेकाकिनी। प्रियतमद्वितीयासि। कथमावामनुरुणत्सि।

चंचला– यथेमे प्रियसख्यौ अहमिव स्वप्रियतमं न प्राप्नुयातां शिवसन्निधानादिति कृत्वैव निवारयति गमनमावयोः।

(इति हसन्ती निष्क्रान्ता। प्रेरणापि जिगमिषति किन्तु कविशेखरस्तां हस्तेन गृहीत्वोपवेशयति)

कवि०– तप्तासि देवि ज्वरदाहेन। नार्हसि गन्तुमिदानीम्। निदाघातपादपि दुःसहोऽयं कामोपतापः–

छायाभिश्शममेति तीव्रतपनस्तापो निदाघोद्भवः,
तत्रैव प्रबलायतेऽतिकठिनस्तापस्तु कामोद्भवः।
हैमाद्रौ समुपागतस्य भुवने लुप्ता निदाघव्यथा
किन्त्वत्रापि न काम पीडितजनैश्शान्तिस्सखे! प्राप्यते।।१८।।

अतः कञ्चित्कालं यावत् अस्मिन्नेव भूर्जतरुसघनभुजच्छायावृते तुषारशीतले शिलातले शयनीयमुपकल्पयितुमर्हसि प्रिये।

प्रेरणा— हृदयवल्लभ! क्षणपरिचय एव नावसानमेतु प्रणय आवयोः। न जाने कथं प्राणा विश्वसन्ति यज्जनान्तरीयोऽनुराग आवयोर्वर्तति।

कवि— सत्यमेवाभिहितं प्रिये! पश्य—

प्राण प्रिये! बहुतरं खलु दुःखभारं
यन्मत्कृते नु सहसे सकृदेव दृष्ट्वा।
नूनं बिभर्ति जननान्तरसौहृदं तत्
अन्यन्न कारणमिहास्ति शुभाननाब्जे।।१९।।

प्रेरणा— दयित! नेदं जीवनं वर्तिष्यते त्वया विना। यद्यपि न मया पूर्वानुभूतोऽयं व्याधिस्तथाप्यधुना चिन्तये यत्कथं प्रियतमभुजोपधानं विना जीवनमद्यावधि नीतं मया। पश्य—

दृष्ट्वा सखीजनगणं निजकान्तयुक्तं,
दृष्ट्वा लतास्तरुषु गाढभुजोपगूढाः।
यत्कल्पितं रहसि किञ्च सखीजनेषु,
तत्सर्वमेव तव बाहुतलें लभेऽहम्।।२०।।

कवि०— (भुजौ प्रसार्य) एहि मे जीवितसर्वस्वे। कृतार्थीकुरुष्व प्रणययाचकम्—

गाढाश्लेषैः सुतनु! हृदये प्रीतिबीजं वपस्व;
सीधुं दत्वाधरयुगलयोः सिञ्च रम्यांकुरं तत्।
बाहुप्रान्तै रचय दयिते! निर्मलञ्चालवालं,
प्रेमानन्दः फलतु मधुरे! कल्पवृक्षेऽस्मदीये।।२१।।

(नेपथ्यात्)

अये! मित्र कविशेखर! क्वासि? देहि मे प्रतिवचनम्।

कवि०— (आकर्ण्य) अये! कुतोऽयमसमये सम्प्राप्तो मे वयस्यो वृत्तोदरः। का वार्ता? सखे वृत्तोदर! अत्रास्म्यहम्।

वृत्तोदरः– का वार्ता? अत्येति गमनवेला। सर्वेऽप्यनुयात्रिकास्त्वामेवान्वेषयन्ति। अपिं च श्रूयते यत्कापि निजकुलजनसमूहान्निष्क्रान्ता मृगी कमपि सौगन्धिकं मृगमनुसरन्ती गहनं कान्तारं प्रविष्टा। तस्या अन्वेषणे जना इतस्ततः पर्यटन्ति। तर्हि शीघ्रं दर्शनपूजनादिकं निर्वापय।

कवि०– (श्रुत्वा) प्रिये! मन्ये परिजनास्त्वामेवान्वेषयन्ति।

प्रेरणा– (ससम्भ्रमा) प्राणेश! क्षम्यताम् पिपासितं त्वां त्यक्त्वा गच्छामि। हृदयन्तु मेऽत्रैव तव सन्निधाने वर्तते।

कवि०– (सत्वरमुपसंगम्य) भामिनि! मैवम् सन्तप्ते धातावेव देवप्रतिमा घटते। परितप्ते ग्रीष्मे फलानि पच्यन्ते। तर्हि वियोगतप्तयोरावयोर्हृदयक्षेत्रयोः प्राप्तकालेन पुनरपि भविष्यति कल्पवृक्षाविष्कारः।

प्रेरणा– (हस्तं पल्लवयन्ती) आमन्त्रये त्वां पुनर्मिलनाय।

कवि०– अहमपि प्रिये!

(निष्क्रान्तौ)

।।इति द्वितीयोऽङ्कः।।

तृतीयोऽङ्कः

अपरा०— (प्रविश्य) कीदृशीयं विपत्तिरागता? हिमालयस्य शैत्यमनुभवितुं, शान्त्यर्थं तथा च भगवतो बदरीशस्य दर्शनार्थं कृतायामस्यां यात्रायां वह्निव्यापारो लब्धः प्रियसख्या। दिनत्रयात्सा न खादति न शेते, केवलं तमेव कविश्रेष्ठं चिन्तयन्ती शून्यदृशा मां चञ्चलां च पश्यति। (अन्यतो गत्वा) अहो विधेर्निष्ठुरत्वम्। यः खलु मृणालिनीं पंकेन योजयति, चन्द्रलेखां कलंकेन दूषयति, मणौ काठिन्यं विदधाति। स एव हिमाद्रौ तादृशमनुरागवह्निमपि जनयति यस्य परितापात् प्रियसखी मे मृतप्रायाऽऽस्ते। इदानीं पुनः दिनद्वयात् प्रावृट्कालिकं वर्षणमपि समारब्धं यत्खलु व्रणे लवणमिव भवति कामिनां कृते। न जाने किमध्यवस्यति विधिः? सर्वथा दुर्निवारा एव देवा भवन्तीति सत्यम्।

चंचला— (प्रविश्य) अत्याहितम् अत्याहितम्।

अपरा०— (श्रुत्वा) किमत्याहितं चंचले! किमत्याहितम्?

चंचला— सर्वथा विपरीतमारब्धं दैवेन।

अपरा०— किं विपरीतमारब्धं दैवेन कथय कथय प्रिय सखि।

किं मध्ये दिवसं सुवर्णकिरणैस्त्यक्तोऽभवद्भास्करः,
किं वा घोरनिशीथ एव गगनाल्लुप्तोऽखिलश्चन्द्रमा।
किं वा शेषफणाभिरद्य धरणीभारेण त्यक्ता धृतिः,
येनाक्रोशपरायणासि विकले! लोके किमत्याहितम्।।१।।

चंचला— श्रृणोतु प्रियसखी। ज्योतिष्पीठादागतानामस्माकमद्य चतुर्थो दिवसः।

अपरा०— जानामि तत्।

चंचला— न सा प्रियसखी प्रेरणा दिनत्रयात् किञ्चिदपि गृहीतवती।

अपरा०— जाने। पुनः किं नवीनम्?

चंचला— अधुना मात्रा बोधिता सा यथा कथञ्चित् औषधं ग्रहीतुमुत्थिता। ततः—

अपरा०— ततःकिम्?

चंचला— ततोऽकस्मादेव मूर्च्छिताऽपतद्धरणीपृष्ठे विलुलिता मालेव।

अपरा०— धिक्कष्टम् कष्टम्।

चंचला— अतिभूमिं प्राप्ताऽसमर्थेयं कालक्षेपस्य।

अपरा०— तर्हि किमनुष्ठेयमस्माभिः?

चंचला— अनुष्ठेयन्तु सर्वमनुष्ठितमौषधप्रदानादिकं किन्तु नायं व्याधिरौषधैः शमनीयः।

अपरा०— सत्यम्। तर्हि?

चंचला— श्रुतं मया यच्चिकित्सको मातरं प्रति कथयति स्म यन्न वर्तते कापि विशिष्टा वार्ता किन्तु विवाहार्थमस्याः शीघ्रता करणीयेति।

अपरा०— ततो मात्रा किमभिहितम्?

चंचला— तया कथितं यच्छीघ्रमेवेतः प्रतिनिवृत्य वाग्दानमस्याः कल्पयिष्यामो वयमिति।

अपरा०— धिक्कष्टम्! इदमपरं कष्टतरम्—

दारिद्र्ये खलु वर्द्धते प्रतिदिनं तीव्रा बुभुक्षा न किं,
क्लिश्नात्येव मरुस्थलेऽतिनिशिता क्रूरा पिपासा जनम्।
आघातास्सुलभा भवन्त्यविरतं प्रायो हि प्राप्ते व्रणे,
धिक्कारुण्यविवर्जितं विधिमिमं यो हन्ति नित्यं हतम्।।२।।

चंचला— पित्रा त्वस्या उक्तं यदागामिनि मासे वाग्दानमस्याः करिष्यामीति।

अपरा०— किमिदं सर्वं श्रुतं प्रियसख्या?

चंचला— मैवम्। सा तु मूर्च्छिताऽऽसीत्।

अपरा०— हला! उचितमभूत् यन्न श्रुतं तयाऽन्यथा साऽवश्यमेव प्राणाँस्त्यक्ष्यति। साम्प्रतं केनाप्युपायेनान्वेषणीयः स कवितल्लजः?

चंचला— एवमेव सखि।

तृषा शम्या लोके भवति शुचिशीतैर्जलकणैः,
निदाघा वार्यन्ते नवलजलधाराभिरनिशम्।
सुवीर्यं भैषज्यं प्रभवति रुजां दूरकरणे,
प्रियप्राप्तिं त्यक्त्वा कथय कथमस्याः सखि! हितम्।।३।।

अपरा०— कदाचित्सोऽपि बदरीवनमागतो भवेत्। यतो हि तेन कथितं यदहं बदरीवनाय सम्प्रस्थितोऽस्मि। तर्हि शीघ्रमन्विष्यतां स महाभागः। अहमपि तावद् गंगोदकं दूर्वां प्रसादञ्चोपनीय प्रियसखीं पर्युपासितुं गच्छामि। (इति निष्क्रान्ता)

चंचला— (निर्गत्य) कुतो लभेय तं महाभागम्।
(सहसा वृत्तोदरं वीक्ष्य प्रफुल्ला सती) आः आर्य वृत्तोदर! आर्य वृत्तोदर! (आकारयति)

वृत्तोदरः— केयमाकारयति माम्। (इतस्ततो विलोक्य)

चंचला— आर्य वृत्तोदर! इयमहमस्मि चंचला।

वृत्तोदरः— चंचलासि तर्हि मेघैः सह विहर। किमर्थं मामाह्वयसि?

चंचला— कुत्रास्ते मित्रमहाशयः?

वृत्तोदरः— कस्येदं मित्रं नाम? ईदृशन्तु शत्रवोऽपि नाचरन्ति।

चंचला— किं कृतं तेन महानुभावेन?

वृत्तोदरः— किं कृतमिति पृच्छसि? किन्न कृतमिति तावत्पृच्छ।

चंचला— (विहस्य) किन्न कृतमित्येव तावत् निवेदय महाभाग!

वृत्तोदरः— प्रमत्तं मदीयं मित्रं संजातम्। आत्मानं बहुपठितं मन्यते किन्तु न पठितमनेन– "पर्वता हि दूरतो रमणीयाः।" अन्यच्च

शैत्यप्राप्तये हिमालयागमनात्पूर्वं न स्मृतं नैयायिकानां क्वचनम्-" यत्र यत्र धूमस्तत्र तत्र वह्निः पर्वतो वह्निमान् धूमवत्वात् ।" अत एवात्रागत्य कापि प्रेरणा नाम्नी वह्निशिखा आसादिता । तस्याः प्रतीक्षायामेव आदिवसत्रयमत्रैव परिक्रमतेऽसौ लुब्धभल्लूक इव ।

चंचला– तर्हि आर्य! कुत्रास्तेऽसौ?

वृत्तोदरः- तत्रैव भगवतो बदरीशस्य मन्दिरस्थे शांकरपीठे कस्मिन्नपि कोणे स्थितो भवेदिति तर्कये ।

चंचला– अनुगृहीतास्मि महाभाग! सूचनयानया ।

(निष्क्रान्ता)

(ततः प्रविशति कविशेखरः केनापि प्रौढपुरुषेण सहालपन्!)

कवि०- कथयतु भवान्? किं करोमि भवतां कृते?

पुरुषः- विप्रवर्य! भवतामाकृतिविशेषो हि महानुभावतां प्रकटयति । तस्मादाशीर्वादमेव कामयेऽत्रभवताम् ।

कवि०- आशीर्वचांसि तु सिद्धैर्दीयन्ते न पुनर्मादृशैः–

ये सन्ति वैराग्यविभूतिमन्तः,
ये सन्त्यरण्येषु तपश्चरन्तः ।
ये सन्ति दीनेषु दयां दिशन्तः
शुभाशिषा ते हि भुवं पुनन्ति ।।४।।

पुरुषः– साधु! आचार्यप्रवर! साधु! इदमेव ते वाग्वैशिष्ट्यं पौनः पुन्येनाकर्षति माम् । दुःखितोऽस्म्यहमत्रभवता किञ्चित् प्रष्टुकामोऽस्मि ।

कवि०– पृच्छतु भवान् ।

पुरुषः– (कर्गलमेकं प्रसार्य) इयं मम कन्याया जन्मपत्रिका । तस्याः परिणयार्थं सर्वं सज्जीकृतं; वरोऽपि लब्धः, केवलं

वाग्दानमेवावशिष्टम् किन्तु सा दिनत्रयात् बलवदस्वस्था प्रतीयते। तस्याः कष्टेन व्यथितोऽस्मीति।

कवि०– (पत्रिकां वाचयित्वा) ग्रहकौटिल्यप्राबल्यादियं परिणयन्तु लप्स्यते न पुनरात्मसन्तुष्टिम्। साम्प्रतिकी व्यथापि प्रवर्तिता ग्रहकष्टादेव।

पुरुषः– कोऽप्युपचारस्तावत्?

कवि०– भगवन्तं शिवमाराधय। स एव समेषां प्रशमकरः–

अतिकठिनललाटे लेखभाषाग्रहाणां,
न हि भवति विनाशे कोऽपि शक्तो जगत्याम्।
सकलभुवनगोप्ता शंकरस्सुप्रसन्नो
लिखितमपि ललाटे शक्त एव प्रमार्ष्टुम्।।५।।

पुरुषः– सर्वथोचितमेव भणितमाचार्येण। आचार्यप्रवर! ममैषाभ्यर्थना यच्छिवाराधनमत्रभवतां सान्निध्य एव सम्पादितं स्यात्।

चंचला– (प्रविश्य) अये! स्वामिन्! अत्रोपविष्टो भवान्? तत्र तस्यास्तव बालिकाया दशा शोचनीया संजाता। (कविशेखरश्चंचलां तत्र दृष्ट्वा किञ्चित्प्रष्टुमिच्छति सा संकेतेन निवारयति)

पुरुषः– किं कथयसि चंचले! अहन्तु तस्या अमंगलं शमयितुं तपस्विनमेतं तस्या जन्मपत्रिकां दर्शयितुमागतः। (कविशेखराभिमुखीभूय) आचार्य! शीघ्रमागम्यतामनया सह ममावासस्थानकम्। अहं पुनः पूजोपकरणान्यादाय शीघ्रमेवायास्यामि। (इति निवेद्य निष्क्रान्तः)

कवि०– चंचले! किं वृत्तम्? क एते महानुभावाः?

चंचला– प्रेरणायाः पितृचरणा इमे। कवे! अत्रभवद्भिः महत्कष्टे निक्षिप्ता मे प्रियसखी।

कवि०– कष्टं कष्टम्। क्षम्यतां देवि!

चंचला– कथं क्षमया कार्यं सेत्स्यति। शीघ्रमेहि कविवर्य! (उभौ निष्क्रान्तौ).

(ततः प्रविशति सखीद्वितीया शयनतले निषण्णा मुद्रितनयना प्रेरणा)

अपरा०– सखि! हस्तसम्मर्दनेन किञ्चित् सुखमनुभूयते त्वया?

प्रेरणा– हला! यत्किञ्चित्। न पुनश्शान्तिर्भवति तापस्यास्य।

अपरा०– जाने सखि जाने! चंचला गतास्ते औषधमन्वेष्टुम्।

प्रेरणा हला!

यत्पाणिपल्लवतलं तरलाङ्गुलीभि-
र्युक्तं व्यधादपरिमेयसुखानुभूतिम्।
तस्याः स्मृतिर्दहति मामनिशं वियोगे,
किं वाऽमृतं गरलतामुपयाति रागे।।६।।

अपरा०– नाहं जाने सखि।

प्रेरणा– मम हृदये स्वकीयं हस्तं स्थापय। प्रतीयते यच्छीघ्रमेव प्राणा उत्क्रमिष्यिन्ते। (रोदिति)

अपरा०– (रुदती) हला! सखि! धैर्यन्तावदवलम्बस्व। (अपरा स्वहस्तं तस्या उरसि स्थापयति। प्रेरणा नेत्रे निमीलयति। शनैः प्रविशति चंचलया सह कविशेखरः। स संकेतेन अपराजितां निवार्य स्वकरेण तस्या अश्रूणि प्रमार्जयति)

प्रेरणा– (मीलितलोचनैव तस्य करं कपोले गृहीत्वा) हला! अपराजिते! मा मेऽश्रुप्रमार्जनं कुरु। रोदनेन हि सह्या भवति वेदना।

नेत्रे निमील्य परिकल्प्य च चित्तयोगात्,
हृत्स्थं प्रियं मुहुरहन्तु समर्चयामि।
मुक्ताफलाश्रुमणिखण्डवतीमिमां मे
मालां प्रियाय विरचय्य समर्पयामि।।७।।

(कविशेखरस्याप्यश्रुपातो भवति)

प्रेरणा— (स्वकपोलेऽश्रुबिन्दुपतनं विलोक्य नेत्र उन्मील्य ससम्भ्रमं) कथं कथमार्यपुत्र! दयित!

कवि०— जीवितेशे! वल्लभे! कीदृशी ते दशेयं संजाता? (तस्या शिरः स्कन्धे स्थापयति)

येनासि घोरविषमे विनिपातिता त्वं
प्रीतिव्यथाज्वरदवाग्निसुतापतप्ता।
अस्मै प्रिये! त्वदपराधिन इच्छया त्वं
दण्डं विधेहि निभृतं तव बाहुपाशैः।।८।।

चंचला— (नेपथ्यात्) आचार्य! यदि पूजाविधेः पूर्वकर्म अवसितं तर्हि विधेयाऽऽज्ञा। एष तातः समागच्छति पूजोपकरणैः सह।

कवि०— (श्रुत्वा) सम्प्राप्ताः गुरुजनाः प्रिये! प्रकृतिस्था भव तावत्!

पुरुषः— (प्रविश्य) जाते! कीदृश्यसि साम्प्रतम्।

प्रेरणा— स्वस्थास्मि तात!

पुरुषः— एषाऽऽचार्यचरणानां कृपैव प्रत्यक्षीभूता। आचार्य! तवागमनादेव मे पुत्र्या व्याधिर्दूरीभूतः। तत् प्रतिगृह्णतु ममाञ्जलिम्। (प्रणमति)

कवि०— (सप्रणामम्) स्वस्ति भवते! सर्वं शोभनमेव भविता भगवतो महामहेश्वरस्य कृपया।

पुरुषः— समर्चनन्तावत् सम्पादयन्त्वत्रभवन्तः। (पूजोपकरणानि स्थापयति। कविशेखरः पूजनमुपकल्प्य स्तौति)

कवि०— (बद्धाञ्जलिः सन्)—

नमश्शम्भवे श्रीमते शङ्कराय,
नमश्शूलिने हर्षदात्रे शिवाय।
नमः पार्वतीप्रीतिपाशस्थिताय
नमो बालकानां कृते वत्सलाय।।९।।

नमः सर्वमित्राय सर्वसहाय
नमः सर्वसंहारकर्त्रे विधात्रे।
नमः पार्वतीरम्यधम्मिल्लदेशस्थ-
सिन्दूरसौभाग्यरागाय नित्यम्।।१०।।
भजे भक्तवृन्दैकपालं कृपालं
कपालेन्दुपालं प्रियं लोकपालम्।
जगत्पालकं बालकं घालकं वा
भजेऽहं सदा लालकं बालकानाम्।।११।।
शिरश्चन्द्रिकाधौतकेशाय नित्यं
स्वभालस्थगंगाजलैः शीतलाय।
कपालस्थवह्निप्रतापानुशान्त्यै
भजेऽहं शिवं शङ्करं शान्तमूर्तिम्।।१२।।

(सर्वे प्रणमन्ति)

कवि०— अनुजानातु मां गमनायात्रभवान्।

पुरुषः— आचार्य! पुनः कदा दर्शनं भविष्यति?

कवि०— यदा भगवतो महेश्वरस्य संकल्पो भविता।

पुरुषः— जाते! प्रणमात्रभवन्तम्।

प्रेरणा— अभिवादयेऽत्रभवन्तमाचार्यप्रवरम्।

कवि०— स्वस्ति भवत्यै।

(निष्क्रान्तः)

।।इति तृतीयोऽङ्कः।।

अथ चतुर्थोऽकः

कवि०— अहो! कीदृशे विषमावर्ते निपतिता मे जीवनतरणी। एकतोऽनुरागविजृम्भिता प्रियाऽपरतश्च श्रद्धान्वितस्तस्या: परिवारो य: खलु परमेश्वरानन्तरं मय्येव विश्वसिति। अनुल्लङ्घनीयौ द्वावपि सम्बन्धौ। किमहं करवाणि?

जन्मान्तरप्रणयरागवती प्रिया सा
सर्वातिगा च परिवारजनस्य भक्ति:।
भावद्वयान्तरगतेन मया किमद्य
दोलाधिरूढमनसाऽऽचरणीयमस्ति।।१।।

संस्कारपूते मे मनसि नाविनय: प्रवर्तते किन्तु दु:स्सहश्शरीरधर्मोऽपि झंझावात इव मां मथ्नात्येव—

भोगप्रचण्डवनमारुतचञ्चलोऽसौ,
दीपो मदीयमनसो विकलोऽधुनास्ते।
निर्वाणमस्य न भवेदशिवे कुमार्गे
तत्त्वं विभो दिश ममाद्य किमस्ति कृत्यम्।।२।।

कुत्र गच्छामि यत्र शान्तिं लभेय। सर्वथा प्रभुरेव रक्षां विदधाति। किन्तु यदा प्रभोरायतनादेव व्याधि: सम्भूतश्चेत्तर्हि कुत्र शरणम्! श्रूयते परमेश्वरे कुपिते सति गुरुरेव रक्षितुं शक्नोति। अतस्तानेव गुरुचरणानुपासितुं गन्तव्यमधुना। यतो हि—

जगति विहगपङ्क्त्या प्रीतिरीत्या निजाण्ड
निजचरणतलस्थं रक्ष्यते नित्यमेव।
गुरुचरणकृपाया जीवनेऽस्मिंस्तथैव
शरणमुपगतानां नो भयं क्वापि लोके।।३।।

(परिक्रम्यावलोक्य) इदमस्माकं गुरुचरणानामाश्रमपदम्।

अहो! कीदृशी शान्तिर्विराजतेऽत्र

द्रुमा नृत्यन्तीमे तरलपवनाधूतशिरसः,
महानन्दे मग्ना हरिचरणभक्ता इव समे।
द्विजा वेदाभ्यासे निरतवटुसंघातसदृशाः,
वनान्ते कूजन्ति प्रकृतिमधुरा दिक्ष्वविरतम्।।४।।

तत्कमत्र पृच्छामि कुत्र सन्ति गुरुचरणा इति। (परिक्रम्यावलोक्य) अहो! सौभाग्यान्मे प्रियसखा रसामृतोऽत्रैवागच्छति। अये! मित्र रसामृत! (आकारयति)

रसामृतः– (दृष्ट्वा सहर्षम्) मित्र कविशेखर! कदा सम्प्राप्तो भवान्?

कवि०– साम्प्रतमेव। अपि सर्वं कुशलमाश्रमप्रान्ते?

रसा०– सर्वमपि कुशलं बन्धो!

कवि०– कीदृशी ते प्रचलति काव्यसाधना?

रसा०– गुरुचरणकृपातो निर्विघ्नतयैव प्रचलति।

कवि०– कुत्र संस्थितास्सन्ति गुरवोऽस्माकमार्या विद्याधराः।

रसा०– इदानीं सारस्वतसपर्याविधिमनुष्ठातुं शारदापीठ एव तत्रभवद्भिर्भाव्यम्।

कवि०– धन्यं धन्यं! रसामृत! धन्योऽसि–

भक्तिज्ञानविरागपूर्णमनसां कारुण्यसच्चेतसां
नानाशास्त्रसुधारसामृतधुनीपूतात्मनां सर्वतः।
श्रीविद्याकृपयाप्तपूर्णमहसां नूनं गुरूणामहो
पादाब्जे निवसन्ति ये तु मनसा ते धन्यभाग्याः सखे।।५।।

रसामृतः- एवमेतत् बन्धो!

कवि०– तदेहि। गुरुचरणदर्शनेनात्मानं पुनीमहे।

रसा०– इत इत आर्य! (परिक्रम्य) इमे आचार्यचरणास्तिष्ठन्ति–

सौवर्णैर्घटितं शुभं वपुरिदं प्रक्षालितं चन्दनैः
रुद्राक्षस्फटिकप्रवालमणिवद्धारैर्दधानं श्रियम्।
मन्त्रोच्चारणसुन्दराक्षरमुखं दृष्ट्वा मुदा श्रीगुरोः,
शान्तिं याति न कस्य मानसतलं शान्ते सखे! ह्याश्रमे।।६।।

कवि०— साधु रसामृत! साधु। गच्छामस्तावत्। (अग्रे गत्वा स्वगतम्) वेपते मे हृदयं गुरुसमक्षं गन्तुम्। परहृदयाभिज्ञे गुरौ सर्वमपि मे दुर्वृत्तं ज्ञातं भविता तदा किमध्यवस्यति किं वा वक्ष्यतीति न जाने। किन्तु कान्या गतिः? चिकित्सकस्य गणकस्य गुरोश्च सन्निधाने स्वात्मनिवेदनं विना न सम्भवति कल्याणम् यतः—

चिकित्सको वेत्ति नरस्य नाडीं,
दैवज्ञ एवञ्च ललाटलेखाम्।
गुरुश्च जानाति समग्रवृत्तिं
किमस्त्यविज्ञातमिति त्रयाणाम्।।७।।

विद्या०— अये! कविशेखर! वत्स! द्वारदेश एव स्थितोऽसि किम्? एहि एहि!

कवि०— (झटिति समुपगम्य पादयोः प्रणमति) गुरोः! क्षमस्वाविनयं ममापराधिनः।

विद्या०— आयुष्मन्! कथं विह्वलोऽसि—

यच्चापल्यविवर्जितं हि रमते तच्छैशवं नो मतं,
यल्लोकेषु न चर्चितं बहुतरं नो यौवनं यौवनम्।
यद्धर्मे न नियोजितं हितकरे नो वार्द्धकं वार्द्धकं,
तत्त्वं ब्रूहि धरातले कथमहो वत्स! त्वयाऽत्याहितम्।।८।।

कवि०— गुरो! सर्वं जानासि। सर्वं जानासि। किं पुनरहं वच्मि।

विद्या०— वत्स स्वस्थो भव।

ऋणानुबन्धीनि मनुष्यलोके,
भवन्ति कर्माणि शुभाशुभानि।
विनोपभोगं न च तानि यान्ति
कृतार्थतां वत्स! किमत्र चित्रम्।।९।।

कवि०— कृतार्थोऽस्मि। अनुगृहीतोऽस्मि देव!

विद्या०— वत्स! पश्य—

गर्भे यल्लिखितं ललाटफलके भोक्तव्यमेवास्ति तत्
ब्रह्माद्याः शिवविष्णुशक्रविबुधास्तल्लङ्घने न क्षमाः।
धीरः सर्वमवेक्ष्य बुद्धिसुदृशा लोके सदा वर्तते
कल्याणं लभते स्वधर्मनिरतस्तद्धर्मनिष्ठो भव।।१०।।

कवि०— विभो! सर्वं जाने। न तथापि निवर्तते हृदयस्य व्याधिः।

अनुदिनमनुरागज्वालया वर्द्धितोऽसौ,
सकलभुवनजेता मानसे मे निविष्टः।
दहति निशितबाणैर्मन्मथाख्यो हि देवः
कथमिह भवतान्मे शीलसम्पत्तिरक्षा।।११।।

विद्या०— वत्स मा भैषीः। मा भैषीः। चिन्तयिष्याम्युपायं ते हिताय। तावत्त्वं गच्छ। निर्वर्तय नित्यं कर्म यावदहमपि सन्ध्यामुपास्यागच्छामि।

कवि०— यथाज्ञापयन्ति गुरवः। अभिवादये। (प्रणमति)

विद्या०— स्वस्ति भवते। (निष्क्रान्ताः सर्वे)

(ततः प्रविशति कुटजस्थः कविशेखरः)

कवि०— अहो! महानुभावता सद्गुरोः। विनैव निवेदनं सर्वं विज्ञाय ममापचरितं कीदृशमपवारितम् तत्रभवता। अथवा नेदमाश्चर्यकरं परमहंसानाम्—

सम्प्राप्यापि समस्तसिद्धिविभवं भक्तिप्रभावादिमे,
सिद्धा नैव रमन्त एषु भुवने चैभ्यो विरक्तास्सदा।
त्यक्तं नश्वरवैभवं खलु यदा तत्का स्पृहा सिद्धिषु,
ब्रह्मानन्दपरा अतो मुनिजना ज्ञाने रमन्तेऽनिशम्।।१२।।

आदिष्टोऽहं गुरुणा नित्यकर्मानुष्ठानार्थं किन्तु न मे समाधिः स्थिरायते। पौनःपुन्येन निमीलिते नयने सैव स्फुरति कान्ताकृतिः।

किं करोमि?

मोघीकृताक्षिगतिकेऽपि मदीयचित्ते,
साऽऽयाति भावमधुरा मदिरेक्षणा हा।
तस्या मनोहरमुखं तु समाधिकाले
स्वैः सुस्मितैर्मम मनोहरणं विधत्ते।।१३।।

देव! शम्भो! रक्ष माम्। रक्ष माम्।

रसा०– (प्रविश्य) बन्धो! कस्मादत्र भयम्, यद्रक्ष मामिति भणसि।

कवि०– नास्ति किमपि भयं बाह्यतः। भयन्तु स्वात्मन एव।

रसा०– नाहमवगच्छामि ते प्रहेलिकाम्। स्पष्टं भण।

कवि०– नास्ति किमपि कथनीयमत्र।

रसा०– यदि नास्ति तव पार्श्वे किमपि कथनीयन्तर्हि मम पार्श्वे वर्तते किञ्चिद् दर्शनीयम्।

कवि०– दर्शनीयं वर्तते तर्हि दर्शय तावत्।

रसा०– एहि सखे! अवलोकय तावत् दर्शनीयानां परां काष्ठाम्। (इत्यङ्गुल्या दर्शयति। ततः गुरुं विद्याधरं प्रणमन्तीं प्रेरणां विलोक्य जडीभूतो भवति कविशेखरः निर्निमेषदृष्ट्या तामवलोकयति)

रसा०– (नयनपथे हस्तं प्रचाल्य) बन्धो! किमिदम्? स्थाणुभूतो

ऽत्रभवान् दर्शनीयं दृष्ट्वा।

कवि०— (ससम्भ्रमम्) रसामृत! सत्यमुक्तं त्वया। दर्शनीयानां पराकाष्ठेयम्—

सर्वानन्दमयी निशाकरकला निर्वाणदा नेत्रयोः,
सौन्दर्याब्धिनिमन्थनैरधिगता लोकोत्तरा श्रीरियम्।
स्वर्लोकादिव भूतलेऽवतरितैषा वैजयन्ती सखे,
कामस्यैव विभाति रूपरमणी मे मानसाकर्षिणी।।१४।।

रसा०— मुग्धोऽसि बन्धो! अस्या अवलोकनादेव कविता ते प्रास्फुटत्।

कवि०— कवितया रूपमस्या न वर्णयितुं शक्यते।

जडैर्वर्णैर्युक्ता सितमसियुता मेऽस्ति कविता,
क्व चेयं सौवर्णी सुखदसितवर्णैः सुघटिता।
न लेखन्या सृष्टा विरसजडयाऽऽस्ते रसमयी
कथं वर्ण्यातः स्यात्कथय मम वाण्या कवितया।।१५।।

रसा०— सुष्ठु भणितं सखे!

कवि०— कुत इयमायाता? कुत्र वा जिगमिषति?

रसा०— नाहं जाने। यद्याज्ञापयतु भवांस्तर्हि गत्वा पृच्छामि।

कवि०— नहि नहि। अपरिचिता युवती न किमपि प्रष्टव्या।

रसा०— उचितमेवैतत्। (दृष्ट्वा) अये! गुरुचरणा अनया सहात्रैवागच्छन्ति।

(उभौ वृक्षान्तरितौ भूत्वा विलोकयतः)

प्रेरणा— अभिवादये गुरो!

विद्या०— स्वस्ति वत्से! कीदृश्यसि?

प्रेरणा— स्वस्थास्मि गुरुचरणकमलप्रसादात्।

विद्या०— शोभनम्। गृहे सर्वं कुशलं वर्तते?

प्रेरणा— (आत्मगतम्) गृहे तु कुशलं परमात्मनि न कुशलम्।
(प्रकाशम्) कुशलमस्ति गुरुचरणाः।

विद्या०— (विहस्य) त्वया किञ्चिद् विचार्योत्तरितम् जाते!

प्रेरणा— (सभयमात्मगतम्) किं परिज्ञातास्मि गुरुणा?

विद्या०— जाते! हृदये वसति जगन्नाथः स सर्वं जानाति।

प्रेरणा— (स्वगतम्) हृदये तु कोऽप्यन्य एव प्रतिवसति।

विद्या०— जाते! हृदये तु यः कोऽपि निवसति स जगन्नाथस्यादेशादेव न पुनः स्वात्मप्रेरणया।

प्रेरणा— (स्वगतम्) गृहीतास्मि गुरुणा। (लज्जां प्रदर्शयन्ती स्थिता)

विद्या०— (विहस्य) एहि! अत्रोपविश छायाद्रुमतले। कथय वत्से! किन्निमित्तं दूयते ते हृदयम्—

वद कथमसि तप्ता का व्यथाऽरुन्तुदा ते,
दहति सुमुखि चित्तं यत्त्वमेवंविधासि।
निगदति यदि दुःखं कोऽपि कस्मै स्वकीयं,
तदिह जगति नूनं क्षीणतामेति सद्यः।।१६।।

प्रेरणा— (स्वगतम्) कथं निवेदयामि? उताहो स्वाविनयविनिवेदनापराधादात्मानं लज्जयामि। न मे वाक् प्रसरति। अस्तु तावदिदं भणामि। (प्रकाशम्) देव! सर्वं जानाति भवान् तत्किं पुनरयं प्रश्नः? यद्याश्रमस्था लता न भवति पुष्पिता तर्हि भवान् दूयते न वा?

विद्या०— ज्ञातवानस्मि वत्से! दूये दूये तस्या विफलत्वं वीक्ष्य।

वासन्ते समयेऽपि फुल्लकुसुमैर्नाविर्जिता चेल्लता,
निर्भृंगा फलपत्रपुष्परहिता श्रीवर्जिता स्वाश्रमे।
दृष्ट्वा तामनिशं तदा बहुतरं दोदूयते मे मनः
सर्वः क्लिश्यति मानवः क्षितितलेऽस्मिन्सन्ततेर्दुःखतः।।१७।।

प्रेरणा— वस्तुतः श्रीवर्जिताऽस्मि संवृत्ता।

कविशेखरः—(विटपान्तरित एव) तथ्यमुवाच गुरुः। इयं हि—

अन्तस्तापमलीमसाश्रुनिवहैरुष्णैर्जलैः सेचनं
लब्ध्वा स्वर्णमुखप्रसन्नमधुरा कान्तिर्गता कश्मलम्।
काठिन्येन विवर्जितं तनुगतं तत्सौष्ठवं खिद्यते
यच्चास्याः वपुषीह पल्लवकृतां शोभान्तु दध्रे पुरा।।१८।।

विद्या०— वत्स! सौभाग्यात् स्थान एव ते मनो-निक्षेपः संजातः।

अतिरभसकृतं यत्कर्म जाते त्वयैतत्
पशुपतिकृपया तत्साधितं सत्वरं हि।
शरणविरहितेषु क्षिप्रकर्मानुगेषु
भवति विषमदाहो जीवने सत्यमेतत्।।१९।।

किन्तु?

प्रेरणा— (सभयम्) गुरो! "किन्तु" इति किमर्थम्?

विद्या०— (चिन्तामभिनीय) किन्तु?

प्रेरणा— (व्याकुलीभूय) गुरो! गुरो! कथय तावत् किन्तु?

विद्या०— किन्तु भाग्यरेखा ते मनोऽभिलषितं दूरीकरोति।

प्रेरणा— हा हतास्मि। (पादयोः पतति)

कवि०— (विटपान्तरित एव) हा हताः स्मो वयम्। (वृक्षाश्रयं गृह्णाति)

विद्या०— वत्से! समाश्वसिहि समाश्वसिहि।

रसामृतः— (कविशेखरं प्रति) बन्धो! प्रकृतिस्थो भव। समाश्वस्तो भव।

प्रेरणा— (अश्रुपूरितमाननमुत्थाप्य) गुरो! किमिदमादिष्टन्त्वया? यदि फलाशैव नास्ति तत्किमिति शिवेनारोपितस्स सहकारवृक्षः। तर्हि कथं स्वायतने विरचितमस्यालवालम्। कथं सेचनं कृतं स्नेहवारिणा? (रोदिति)

विद्या०— जाते! जाते! स्थिरीकुरु तावदात्मानम्। अनुल्लङ्घनीयं हि

दैवम्। सर्वं शं करिष्यति शङ्करो महादेवः। स एव प्रभुरस्माकम्। गच्छोटजम्। अहमपि तावद् युवयोः समाधानायाभ्यर्थये भगवन्तं पिनाकपाणिं चन्द्रशेखरम्।

(स्वहस्तेन प्रेरणां सान्त्वयित्वा निर्गच्छति)

प्रेरणा— अतीवास्मि दुर्भगा। हा देव कविशेखर! हा प्राणवल्लभ! कदा पुनस्त्वामवलोकयिष्ये?

कवि०— (सत्वरमुपगम्य कराभ्यां तस्या मुखमुन्नमय्य) अयि करुणे! जीवितेशे! साधय आत्मानम्। प्रकृतिस्था भव।

प्रेरणा— (विह्वलीभूय तं गृह्णाति) कुतस्त्वं समुपागतोऽसि प्राणेश!

कवि०— अहन्तु वियोगखिन्नमात्मानं विनोदयितुमत्रागतवानस्मि। तदैवात्रभवती दृष्टा मया गुरुणा सहालपन्ती।

प्रेरणा— (स्मृत्वा रुदती) नाथ! गुरुचरणैर्यदुक्तं तच्छ्रुतन्त्वया न वा?

कवि०— प्रियो! श्रुतं तद् दारुणं मर्महरञ्च।

सीसं सुतप्तमधुनापि हि कर्णयोर्मे,
शल्यं विषाग्निभरितञ्च हृदि प्रविष्टम्।
तीक्ष्णासिधारविषमैर्विषमुद्गिरद्भिः
मोहाकुलोऽस्मि वचनैरिह दुःखकृद्भिः।।२०।।

प्रेरणा— प्रियतम! नाहं जीवितं धारयिष्ये त्वया विना।

कवि०— प्रिये! नास्ति जीवनं केवलमस्माकम्। देवर्षिपितृ-ऋणानुबन्धिनि जीवने न युक्तमात्मविनाशात्मकं कर्म। धैर्यन्तावदवलम्बस्व।

प्रेरणा— कथं ध्रियेत धैर्यं प्राण! कथं ध्रियेत?

बाहूपधानशरणं रमण! त्वदंके,
रक्तेऽधरे च तरलांगुलिलेखनं तत्।
तन्नेत्रभाषणमतीव मनोहरन्ते
सर्वञ्च तत्कथमहं हृदि न स्मरेयम्।।२१।।

कवि०— जाने वल्लभे! किन्तु–

दैवाधीनं जगत्सर्वं चेष्टते किल वस्तुतः।
दुःखच्छाया सुखच्छाया तत्कृतैव विभाव्यते।।२२।।

प्रेरणा— तर्हि का गतिरावयोः?

कवि०— नाहं जाने। एहि गुरुचरणानेव पृच्छावः। यथा स आदेक्ष्यति तदेव करिष्यावः।

(निष्क्रान्तौ)

।।इति चतुर्थोऽङ्कः।।

अथ पञ्चमोऽङ्कः

(ततः प्रविशति रसामृतः)

रसामृतः- अहो विलक्षणं महतां सत्त्वम्। अभूतपूर्वा हि गुरूणां महानुभावता। लोकोत्तरं हि तप एतेषाम्। असाधारण्येव शिष्यवत्सलता गुरुचरणानाम्। इमे हि–

छित्वा मोहान्धपाशं खलु कलुषमयं शुद्धया ज्ञानदृष्ट्या,
भित्वा ग्रन्थीन् समस्तानतिशयतपसादुःखपूर्णान् भवेऽस्मिन्।
धृत्वा सिद्धीः समग्रा अपि निजमनसा भोगसंकल्पशून्याः,
लब्ध्वाऽद्वैतं निजात्मन्यखिलसुखमये योगिनो वै रमन्ते।।१।।

सप्ताहस्तावद् व्यपगतोऽस्मद्गुरुचरणानां समाधौ। मित्रवर्यस्य कविशेखरस्य तस्य प्रियतमायाश्च समाधानार्थं न जाने कीदृशं तपस्तप्यते गुरुभिः? सान्त्वनं दत्वा ताभ्यां विगते सप्ताह एवात्मप्रकोष्ठं स्थितास्ते न जाने केनानुष्ठानेन तयोः कल्याणार्थं प्रयतन्ते। तावपि च स्वे स्वे कक्षे मौनिनौ भूत्वा न जाने किं जपतः? मन्ये यत्किमपि दैविकमेवानुष्ठानमारब्धं गुरुभिः यतो हि सर्वत्राश्रमेऽनुरागमयी शिथिलता परिव्याप्ता।

"वृक्षाः पुष्पचयं स्वयं मुनिजनेभ्योऽद्यार्पयन्ति स्वयम्,
भिक्षापात्रमपि द्रुमैर्मधुमयैः पक्वैः फलैः पूर्यते।
शाखास्वत्र परस्परं द्विजकुलं शान्त्यैव नीवारकं
दत्वा चञ्चुपुटे प्रसन्नमनसा स्निग्धं जनं पश्यति।।२।।

सर्वं खल्विदं गुरूणां संकल्पशक्तेः प्रभावः। (परिक्रम्य) पश्यामस्तावत् कुत्रास्माकं मित्रवर्यः कविशेखरस्तिष्ठति। सम्भाव्यते यदयमपि हृदयस्थां प्रियां स्मरन्नेव कुत्रापि प्रेमसमाधौ स्थितः स्यात्। गच्छामस्तावत्तस्योटजम्। (निष्क्रान्तः)

(इति विष्कभ्मकः)

(ततः प्रविशति कविशेखरो बद्धपद्मासनस्थः)

कवि०— गुरुचरणैरादिष्टोऽहं चिन्तामणिमंत्रजपार्थं स्मरं न स्थिरायते मे चित्तवृत्तिः। विद्याव्रतानुष्ठानपूतेऽपि मे मनसि भवत्याः शारदायाः प्रतिमासमक्षमपि नयनातिथित्वमुपयाति प्रियायाः सानुरागा मूर्त्तिः-

आमीलितेऽक्षिविषयेऽपि कथं प्रिया मे,
नेत्रातिथित्वमुपयाति मनो हरन्ती।
किं शारदानन इदं घटते समाधौ,
यत्तत्र मे प्रियतमाननमभ्युपैति।।३।।

अथ च—

वाणी जपन्त्यविरतं ननु मंत्रवर्णान्
मध्ये जपं क्वचिदपि प्रविलुप्तधैर्या।
नामाक्षराणि सहसा स्मरति प्रियायाः
चित्तन्तदा विकलतामुपयाति सद्यः।।४।।

हे जगदम्ब! किं करोमि? क्व यामि? (निःश्वस्य) कथं मां वीक्ष्य हसन्तीव प्रतिभासि?

क्रीडास्ति लोकरचना जननि! त्वदीया,
नूनं त्वयैव रचितो भुवि रागपाशः।
मां व्याकुलं समभिवीक्ष्य विचेष्टमानं
तेनैव तत्त्वमसि देवि मुदा हसन्ती।।५।।

किन्तु वद! किं पुत्रोऽप्युपहसनीयो भवति? नेदमुचितमत्रभवत्याः कृते। नेदमुचितम्।

रसा०— (सहसा प्रविश्य) किमिदं नोचितं नाम सखे।

कवि०— (लज्जितो भूत्वा स्वगतं) अये कथं सखा मे रसामृतः प्राप्तः। श्रुतं मे विलपितं मित्रेण। (प्रकाशम्) सखे! अभिवादये! आस्यताम्। किमप्यनुचितं नास्ति।

रसा०— तर्हि कथं "नेदमुचितमिति'' एकान्ते कथयति स्म भवान्?

कवि०— (स्वगतम्) गृहीतोऽस्मि मित्रेण। केन व्यपदेशेनात्मानं गोपायामि। अस्तु तावत्। (प्रकाशम्) मित्र दिवास्वप्नं पश्यता मया यत्किञ्चित् कथितम्। नास्ति तत्र किमपि विशिष्टम्। वद तावद् गुरुचरणाः समाधिविरताः न वा?

रसामृतः- (स्वगतम्) आत्मानं गोपायति मित्रवर्य्यः। अत एव वार्तान्तरं करोति। (प्रकाशम्) साम्प्रतमपि समाधिस्था एव गुरवः। मन्ये पुनः सर्वेऽपि समाधिस्था एवाश्रमपदे साम्प्रतम्—

कवि०— सर्वेऽपि समाधिस्थाः। किमेतत्?

रसा०— कोऽपि भावसमाधौ, कोऽपि रागसमाधौ, कोऽपि जप - समाधौ, कोऽपि चाश्रुसमाधौ दृश्यते। न कोऽपि केनापि सहालपति न वा वार्तां करोति। केवलं स्वकर्मसम्पादनं कृत्वा शान्तभावेन तूष्णीं भवति सर्वोऽपि जनः। तर्हि मन्ये सर्वे समाधिस्था एव।

कवि०— साधु कथितं रसामृत! पश्य—

वृक्षाः कम्पितपल्लवैः करतलैः संकीर्तनं कुर्वते,
मंत्राभ्यासरतो मुहुर्मुहुरयं पुँस्कोकिलः कूजति।
इष्टं हृद्गतमेव शान्तमनसामी साधकास्साधवो
लब्ध्वा प्रीतिसमाधिभावभरिता हृष्टा गुरोराश्रमे।।६।।

रसामृतः— न सर्वे हृष्टा भवितुमर्हन्ति कवे!

कवि०— के पुनर्न सन्ति हृष्टाः?

रसा०— प्रीतिव्याधिनिपीडिताऽखिलतनुर्निःश्वासभारान्विता,
यामाजागरणारुणाक्षियुगला शुष्काधरा तापतः ।
पीताभं वदनेन्दुमण्डलमियं धृत्वा गुरोराश्रमे
दुःखैः सा तपति ध्रुवं गिरिसुता नव्या प्रियप्राप्तये ।।७।।

कवि०— केयं नव्या गिरिसुता नाम?

रसा०— कथमज्ञानीव मां पृच्छसि?

क्षिप्त्वा त्वं स्वयमेव यत्नसहितं रागाब्धिगर्ते सखे!
यस्याः पेशलचित्तमन्दरगिरिं प्रेमामृतं वाञ्छसि ।
सा क्लिश्यत्यनिशं वियोगविषमज्वालावलीढाऽऽश्रमे,
नव्यैव प्रतिभाति मे गिरिसुता घोरं चरन्ती तपः ।।८।।

कवि०— सखे! अवश्यं सा दुष्करं तपति यात्रभवन्तमपि विस्मापयति ।

रसा०— अथ किम्—

अशनमतिकरालं दुःखजालं हि तस्याः
नयनयुगलमुक्तं पेयमप्यश्रुपातम् ।
शयनमवनितल्पे निद्रया हीनमित्थं
तपति कठिनमेषा वल्लभा ते कृशांगी ।।९।।

कवि०— (निःश्वस्य सदुःखम्) सखे! जानेऽहं सर्वं किन्तु सन्तप्ते सुवर्ण एव भवति योग्यताऽलंकारसंघटनस्य । पश्य—

विषमदहनवह्निज्वालया ज्वालितं यद्
तदिह कलुषशून्यं शोधितं स्यात्सुवर्णम् ।
प्रभवति वनितानां भूषणं प्रीतिपात्रं
जगति भवति दुःखानन्तरं हर्षराशिः ।।१०।।

अत एव गुरुचरणानामादेशात् आवां साधनानले जीवनं जुहुवः ।

(नेपथ्यात्)

"रसामृत! रसामृत! क्वासि? शीघ्रमेव स्वमित्रं कविशेखरं पुत्रीं प्रेरणाञ्च मत्सकाशमानय''

रसा०– (आकर्ण्य) अये! गुरुचरणानामियं मेघगम्भीरा वाणी। समाधेर्विरतास्ते मामाह्वयन्ति। (उच्चैः) अयमहमागच्छामि गुरो!

कवि०– सखे! श्रुतं त्वया यद् गुरुचरणास्त्वामाकारयन्ति मम प्रियायाश्चानयनाय। तर्हि न जाने किं वक्ष्यन्ति गुरव इति। चिन्तयानया भृशं व्याकुलीभूतोऽस्मि। अतस्त्वया सहैव गन्तुमिच्छामि।

रसा०– (शीघ्रतया) तर्हि झटित्यागम्यताम्।

(उभौ निष्क्रान्तौ)

(ततः प्रविशति आसनस्थः पटाच्छादितचित्रद्वयसहितो गुरुर्विद्याधरः)

विद्या०– (शारदां प्रति) अयि! जगद्धात्रि! कृपामयि! तवैव प्रभावेण बद्धानुरागमिदं जगज्जायते। तवैव स्नेहमयः पाश आबध्नाति जनान्सर्वान्। सर्वथा दुर्निवारा ते लीला। मातः! दुर्वारोऽयमनुरागव्याधिः। प्रशमो ह्यस्य तवानुभावता। विधेहि करुणाम्–

यावन्नो तव पादपंकजरजः प्राप्नोति सत्कर्मतः,
यावन्नो शिवभावनाम्बुधिजले प्रक्षालितं जायते।
यावन्नो विमलानुरागकुसुमैस्त्वामर्चति श्रद्धया,
तावन्नो मनुजस्य जीवनमिदं साफल्यमारोहति ।।११।।

अतस्त्वामभ्यर्थये वत्सकाविमौ सान्त्वनार्थम्। यत्त्वया समाधावादिष्टं तदेवास्माभिः कृतम्। करुणामयि!

मातः कारुण्यमूर्त्ते! परमशिवतमे! कीदृशी तेऽनुकम्पा,
सुस्नाता यत्र लोकाः प्रतिपलममलाः पूर्णकामा भवन्ति।
त्वं धात्री विश्वगोलं मधुररसमयै स्वैः पयोभिः पुनासि,
को वा शक्तो जगत्यां सकलसुखमयीं ते कृपां संविहातुम्।।१२।।

(इति पादयोः शिरः स्थापयति। ततः प्रविशन्ति कविशेखरो रसामृतः प्रेरणा च)

रसा०— सखे! इयं पुरोवर्तिनी ते गुरोः साधनास्थली।

कवि०— (प्रेरणां प्रति) प्रिये! इयं गुरोः साधनास्थली। प्रविशतु भवती (सर्वे प्रवेशं नाटयन्ति)

प्रेरणा— प्राणेश! न जाने कथं व्याकुलायते मे चेतः।

कवि०— प्रिये ममापि सैवावस्था।

स्निग्धे सदा गुरुजनेऽपि तदग्रभागे
तेष्वादरेण हृदयं परिवेपते मे।
किं वक्ष्यतीति विकलीकृतचित्तवृत्त्या-
युक्तोऽधुना भययुतोऽस्मि सखि क्षणेऽस्मिन्।।१३।।

कवि०— अभिवादये गुरुचरणान्।

विद्या०— स्वस्ति ते स्तात् वत्स।

प्रेरणा— अभिवादये गुरुचरणकमलानि।

विद्या०— स्वस्ति जाते। उपविश मम पार्श्वे।

रसा०— अभिवादये गुरुन्।

विद्या०— स्वस्ति वत्स!

(सर्वे उपविशन्ति। विद्याधरो निपुणं निरूप्य)

विद्या०— अपि कुशलिनौ युवाम्?

कवि०— अत्रभवतां कृपया सर्वं कुशलमेव।

विद्या०— वत्स! भगवती वीणापाणिस्तव हृदये कच्छपीझंकृतिमुत्पादयन्ती सततं नरीनृत्यति। वस्तुत एव कविशेखरोऽसि न केवलं नाम्ना

कवि०— इमानि गुरूणामाशीर्वचांसि न पुनः किमप्यन्यत्।

विद्या०— जाते! त्वमपि मूर्तिमयी साधना या खलु जननान्तरीयैः पुण्यैर्लोकममुं कृतार्थयसि।

प्रेरणा— नाहं मन्दभाग्यास्मीदृशी यां गुरवोऽभिनन्दयन्ति।

विद्या०— नहि नहि वत्से! न त्वं जानासि स्वात्मविभवम्। अहं सत्यं भणामि—

नित्यं शम्भुपदाब्जकेशरकणक्लिन्नस्सुधावर्षको
वत्सो मे कविशेखरः कविकुले नूनं भवेदग्रणी।
त्वञ्चास्य प्रतिभाविधानकरणी सत्प्रेरणोसि ध्रुवं,
तस्मात् कीर्तिलता तवापि भुवने भूयादनन्ता शुभे।।१४।।

उभौ— अनुगृहीतौ स्वः।

(इति पादयोः प्रणमतः)

विद्या०— शेखर! समाधौ दत्तं समाधानं युवयोः कृते अम्बया।

कवि०— (औत्सुक्येन) समाधौ समाधानं दत्तम्? आज्ञापयन्तु भवन्तः।

विद्या०— (रसामृतं प्रति) रसामृत! रसामृत! अपनय तावत् अस्य काष्ठफलकस्य वस्त्रावरणम्—

(रसामृतस्तथाकरोति। काष्ठफलके प्रेरणां शारदारूपेण चित्रितां दृष्ट्वा चित्रलिखित इव भवति कविशेखरः)

विद्या०— वत्स! कथं मूकीभूतोऽसि? इयमेव ते सत्प्रेरणा। इयमेव ते वीणापाणिः शारदा या ह्यस्या मूर्त्या माध्यमेन त्वां शब्दायितं करिष्यति। गृहाणैनाम्। वाचय तावदस्याः पादाङ्कितमाशीर्वचनम्—

कवि०— (आविष्ट इव पठति)

यस्याः स्निग्धविलोललोचनकृपामन्दाकिनी पावनी,
शुष्कान्तःकरणं सुधारसनिषेकार्द्रं करोति ध्रुवम्।
वीणावादनमेदुरा स्मितमुखी हंसासना सारदा
सेयं श्रीकविशेखरार्चितपदा सत्प्रेरणा शारदा।।१५।।

विद्या०— वत्स! एवमेतत्। इयमेव ते वागीश्वरी। या खलु कवेः मनोराज्ये शतधा सहस्रधां विहरति नवनवाभिः कल्पनाभिः समं सैव शब्दार्थझंकृतिरवाविष्कारिणी कविजनमनोहारिणी शारदा भवति। लब्धा चैषा त्वया भगवतो नरनारायणस्य श्री बदरीशस्य प्रसादतो यथा भगवता मन्मथेन लब्धोर्वशी। दिव्यैषा ते मनोराज्य एव विहरतु सत्प्रेरणारूपिणी। अस्याः प्रसादात् भविष्यन्ति ते कीर्तिवर्द्धिन्यः नाना काव्यप्रसूतयः। (इति चित्रमुत्थाप्य कविशेखराय ददाति)

कवि०— (गृहीत्वा रोमाञ्चितः सन्) कृतार्थोऽस्मि। अनुगृहीतोऽस्मि।

विद्या०— (प्रेरणां प्रति) वत्से! साम्प्रतं ते समाधानमपि करणीयम् (रसामृतं प्रति) रसामृत! अपनय तावदपरं वस्त्राच्छादनम्। (रसामृतोऽपनयति। चित्रस्थं कविशेखरमेव श्रीकृष्णरूपेण वेणुवादने रतमभिवीक्ष्य सतृष्णं पश्यति प्रेरणा)

विद्या०— जाते! एष ते प्रियतमः। अयमेवान्तर्यामी ते यः खलु सर्वदा वसति हृदयाकाशे स एवान्तर्यामीति कथ्यते। अतः स एव पूज्यस्त्वया। पश्य! किँल्लिखितमत्र—

प्रेरणा— (पठति)

यद्वेणोः मधुरो रवोऽमृतमयः कर्णोत्सवः सन्ततं,
यन्मूर्त्याः स्मितमाधुरी रुचिकरी नेत्रोत्सवो मत्कृते।
यत्स्मृत्या मम जीवने प्रतिपलं प्राणोत्सवो जायते
श्रीकृष्णः कविशेखरो विजयते स प्रेरणाभक्तिभूः।।१६।।

(शनैश्चित्रं प्रणमति)

विद्या०— जाते! स्वजीवने भक्त्या श्रीकृष्णमुपधाव। वत्स! त्वमपि सावहितो भूत्वा शारदाराधनं कुरु। अस्मिन् कल्पे कृता युवयोर्भक्तिः आगामिनि कल्पे युवयोरखण्डं सम्मिलनं विधास्यति। अस्मिन् जीवने तु लोककल्याणार्थमेव युवयोः प्रेमांकुरः फलितः।

(सर्वाणि पात्राणि मञ्चे समाविशन्ति)

—भरतवाक्यम्—

सर्वे प्रीतिरताः प्रमोदभरिताः सत्कर्मसम्पादकाः
स्युर्लोके रचनाविधानकुशलाः कल्याणकल्पद्रुमाः।
पुण्यामोदविभूतिभूषणधरा लग्ना शिवाराधने,
विश्वस्मिन्नखिले विभातु सततं सत्प्रेरणा शारदा।।१७।।

(विद्याधरो हस्ताभ्यामाशीर्वादं प्रयच्छति कविशेखरः प्रेरणा च परस्परं विलोकयन्तौ नेपथ्यं प्रविशतः)

।।इति पञ्चमोऽङ्कः।।

।।समाप्तञ्चेदं सत्प्रेरणानाटकम्।।

-----------o-----------

मदीयकविते! कुरुष्व गानम्

डा० रमाकान्त शुक्लः
आर-6 वाणी विहारः, नयी दिल्ली-110059

सरस्वतीपादपद्मसेवा
यदीयमास्ते परं हि लक्ष्यम् ।
बुधाग्रगाणामतन्द्रितानां
मदीयकविते! कुरुष्व गानम् ॥1॥

कदापि वागर्थनाम येषां
प्रयुक्तमस्त्रं वृथा न हि स्यात् ।
अलोकसामान्यसत्कवीनां
मदीयकविते! कुरुष्व गानम् ॥2॥

स्वरश्रुतिग्रामरागबन्धै-
रपूर्वसृष्टेः सुसर्जकानाम् ।
शुभाय संगीतसाधकानां
मदीयकविते! कुरुष्व गानम् ॥3॥

मृदाश्मना काष्ठखण्डकैर्वा
सृजन्ति ये नूतनां स्वजगतीम् ।
यशस्विनां शिल्पिनां हि तेषां
मदीयकविते! कुरुष्व गानम् ॥4॥

सुखं धनं स्नेहबन्धनानि
स्वदेशसौख्याय ये त्यजन्ति ।
हुतात्मनां नित्यमेव तेषां
मदीयकविते! कुरुष्व गानम् ॥5॥

परोपकारव्रतं पवित्रं
सदैव ये पालयन्ति हृष्टाः ।
सुपूजितानां सदैव तेषां
मदीयकविते! कुरुष्व गानम् ॥6॥

निजोपदेशैर्मनोऽन्धकारं
विधूय मे शिष्यसन्ततीनाम् ।
जयन्ति, तेषां मुदा गुरूणां
मदीयकविते! कुरुष्व गानम् ।।7।।

स्वतन्त्रतायज्ञदीक्षितानां
चिराय कारासु पीडितानाम् ।
मृतिंवराणां नरोत्तमानां
मदीयकविते! कुरुष्व गानम् ।।8।।

रिपोः करान्मोचयाम्बभूवुः
स्वमातरं भारतावनिं ये ।
विशिष्य तेषां नृणां समेषां
मदीयकविते! कुरुष्व गानम् ।।9।।

मनुष्यतां रक्षितुं स्वयत्नै-
रनुक्षणं शोधतत्पराणाम् ।
प्रबुद्धवैज्ञानिकव्रजानां
मदीयकविते! कुरुष्व गानम् ।।10।।

सहर्षस्त्रशीर्षं सहस्त्रहस्तं
सहस्त्रपादं जनं भजन्तः ।
समुद्यमा ये लसन्ति तेषां
मदीयकविते! कुरुष्व गानम् ।।11।।

विषह्य शीतोष्णवर्षकष्ट
प्रकोपमप्यन्नदायकानाम् ।
तपस्विनां क्षेत्रकर्षकाणां
मदीयकविते! कुरुष्व गानम् ।।12।।

उदन्वदाकाशपर्वतेषु
स्वदेशरक्षाव्रतस्थितानाम् ।
रणोद्भटानां मुदा भटानां
मदीयकविते! कुरुष्व गानम् ।।13।।

विभिन्नखेलासु कीर्तिमानैः
स्वदेशसम्मानवर्धकाणाम्।
जितेन्द्रियाध्यावसायियूनां
मदीयकविते! कुरुष्व गानम् ।।14।।

प्रसन्नवक्त्राः सदासते ये
दरिद्रतायामपि प्रकामम् ।
विशिष्य तेषां श्रमव्रतानां
मदीयकविते! कुरुष्व गानम् ।।15।।

स्वकीयचरितैर्मनस्सु पित्रोः
प्रकामसन्तोषदायका ये।
सुता जगद्भूषणानि, तेषां
मदीयकविते! कुरुष्व गानम् ।।16।।

असज्जनानां कुनायकानां
कृतघ्न-दुर्वृत्त-वञ्चकानाम् ।
विहाय चर्चां, मनस्विनां त्वं
मदीयकविते! कुरुष्व गानम् ।।17।।

सदा प्रजातन्त्ररक्षकाणां
स्वकीयकर्तव्यतत्पराणाम्।
प्रदर्शकानां सृतेरभीते-
र्मदीयकविते! कुरुष्व गानम् ।।18।।

स्वपाणिपल्लवमुदारकल्पं
न कुत्रचिद् ये प्रसारयन्ति ।
नृणां सदायाचितव्रतानां
मदीयकविते! कुरुष्व गानम् ।।19।।

कुरीतयो वा कुनीतयो वा
जगत्यनिष्टं प्रपूरयन्त्यः।
विलोपिता यैः, सभक्ति तेषां
मदीयकविते! कुरुष्व गानम् ।।20।।

स्वकीयवर्णं स्वरं भविष्णुं
विधातुकामासि? तर्हि नूनम्।
तपोधनानां जगद्गुरूणां
मदीयकविते! कुरुष्व गानम् ।।21।।

'सदैव सर्वे भवन्तु सुखिनः
सदैव सर्वे निरामयाः स्युः।'
मनोरथस्यास्य पोषकाणां
मदीयकविते! कुरुष्व गानम् ।।22।।

कुटुम्बमेकं जगद्विधातुं
जनाः सदा ये प्रयत्नशीलाः।
प्रहृष्य तेषां महात्मनां त्वं
मदीयकविते! कुरुष्व गानम् ।।23।।

यदीच्छसि त्वं जनिं स्वकीयां
सदर्थितां कर्तुमार्यशीले!
तदा महिम्नां स्वमातृभूमे-
र्मदीयकविते! कुरुष्व गानम् ।।24।।

अमन्दमानन्दमाप्तुकामा
परेशलीलाब्धिमौक्तिकानाम्।
कदाचिदेकान्तवासमाप्ता
मदीयकविते! कुरुष्व गानम् ।।25।।

शारदावन्दनम्

रचयिता
डा० राम किशोर मिश्रः
संस्कृत-विभागाध्यक्षः
म० मा० डिग्री कॉलिजः
खेकड़ा-201101 (मेरठ) उ०प्र०।

शरदभ्रनिभवस्त्रावृते शारदे! वरदे! नमस्ते।
सारदे! मतिदे! दयादे! ज्ञानदे! नयदे! नमस्ते!
शुभकार्यकारणकारिके! मानदे! शुभदे! नमस्ते।
सौम्यदे! सुखदे! सुरंगे! शारदे! वरदे! नमस्ते।।1।।

भवभूतिदे! भवनिर्भये! भवभाविके! फलदे! नमस्ते।
सद्भावदे! भवभक्तिदे! भवबोधिके! मतदे! नमस्ते।
सद्बुद्धिदे! बुधसंगदे! बुधबोधिके! करदे! नमस्ते।
सुज्ञानदे! विज्ञानदे! शारदे! वरदे! नमस्ते।।2।।

प्रतिभानदे! सुविचारदे! वर्णदे! लिपिदे! नमस्ते।
प्रज्ञाप्रदे! प्रतिभासदे! हस्तपुस्तकदे! नमस्ते।
आभासदे! अभ्यासदे! भासदे! भवदे! नमस्ते।
हे शीलदे! मतिमानदे! शारदे! वरदे! नमस्ते।।3।।

कमलासने! वेदप्रदे! वीणया रसदे! नमस्ते।
पुस्तकधरे! वीणाधरे! संगदे! शुक्ले! नमस्ते।
तन्त्रीस्वरे! कविताप्रदे! काव्यदे! ध्वनिदे! नमस्ते।
देवादृते! सुरवन्दिते! शारदे! वरदे! नमस्ते।।4।।

मारीशस - महिमा

डा० शिवशरणशर्मा द्विवेदी
1/51 विनयनगर, जेलमार्गः,
ग्वालियर, म०प्र० - 474012

मारीशस - धरणी महनीया
महासागरे महाकमलिनी -
समा भाति कमनीया।

प्रेम्णा यत्र वसन्ति मिलित्वा
जना विविध - वंशीयाः
सुरक्षिता यत्रास्ति भारती
सर्व - समादरणीया ।

उच्च - नीच - भावनया रहिता
रीतिः परमोदारा,
विराजते बन्धुता यत्र
सर्वैरप्यनुकरणीया ।

हृदये बाल - सुलभ - नैर्मल्यं
बुद्धौ परम - विवेकः,
यत्र समेषां मनसि समत्वं
सैषा भूः भजनीया।

शान्तिरता शुभ - कान्तिमयीयं
भातु सदा संसारे,
कर्मभूमिरेषा श्रम - रचिता
सर्वेषां नमनीया।

देववाणी – परिषद्वार्ता

षष्ठः पण्डितराज – समारोहः

'देववाणी – परिषद्, दिल्ली' ति संस्थया 2050 तमे वैक्रमाब्दे शुक्लपक्षे पौर्णमास्यां (शरत्पूर्णिमायां) तदनुसारं 30.10.1993 ई0 तारिकायां प्रातः 10.00 वादनतः सायं 6.00 वादनं यावत् श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नयी दिल्ली – 110016' इत्यत्र षष्ठः **'पण्डितराज – समारोहः'** समायोजितः यस्योद्घाटनमुक्तविद्यापीठस्य कुलपतिभिः किञ्च उज्जयिनीस्थमहर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य सचिवैः डा0 मण्डनमिश्र महोदयैर्विहितम्। उद्घाटनसत्राध्यक्षैः पुण्यनगरस्थैराचार्यवशिष्ठनारायणझामहाभागैः पण्डितराज जगन्नाथस्य काव्यशास्त्रीयभाषाया वैशिष्ट्यं समुन्मीलितम्। वाराणस्याः सम्प्राप्ताः वयोवृद्धा विश्रुतविद्वांस आचार्यरामप्रसादत्रिपाठिनः पण्डितराजस्य वैयाकरणत्वमालम्ब्य प्रोक्तवन्तः। अस्मिन्नवसरे परिषन्महासचिवस्य डा0 रमाकान्तशुक्लस्य स्वरे ध्वन्यंकिता 'गंगालहरी' – ध्वनिपट्टिका डा0 मण्डनमिश्रमहोदयैः समुन्मीलिता किञ्च देशस्य विभिन्नेभ्यो भागेभ्यः सम्प्राप्तेभ्योऽतिथिभ्यः श्रीश्यामसुन्दरगर्गोपहृताया: **'गंगालहरी'** पुस्तिकायाः किञ्च डा0 रमाकान्तशुक्लप्रणीतस्य **'पण्डितराजीयम्'** नाम नाटकस्य प्रतिरूपाणि समर्पितानि।

समारोहस्य सत्रचतुष्टये पण्डितराजस्य पद्यानां सस्वरपाठः, बहुभाषाकविगोष्ठी, पण्डितराजस्य काव्यमार्गमाश्रित्य परिचर्चा, विद्वत्सम्मानञ्चायोज्यन्त। समारोहस्य प्रारम्भः सरदारशहरतः सम्प्राप्तायाः श्रीमत्याः डा0 सुमित्राशर्ममहाभागयाः सरस्वतीवन्दनया, अभिनवशुक्लस्य गणेशवन्दनया किञ्च डा0 देवदत्तचतुर्वेदकृतवैदिकमंगलाचरणेन जातः।

समारोहेऽस्मिन् डा0 शिवदत्त शर्मा चतुर्वेदी (वाराणसीतः) डा0 कृष्णचन्द्र चतुर्वेदी (मथुरातः) डा0 श्रीधरवासिष्ठः (दिल्लीतः) डा0 रमेश चतुर्वेदी (दिल्लीतः) पं. रामयत्नशुक्लः (दिल्लीतः) डा0 ललितकुमार गौड़ः (कुरुक्षेत्रतः), डा0 काशीनाथ तिवारी (दिल्लीतः), श्री त्रिलोकीनाथ धरः (दिल्लीतः), श्रीमती शैलकुमारी मिश्रा (इलाहाबादतः), श्री श्यामसुन्दरपाण्डेयः (मुज़फ्फ़रपुरतः), श्रीबाबाजीचरण सत्पथी (कण्टावाड़ातः), डा0 वसन्त कुमारः (करनालतः), डा0 सतीश शर्मा (बघौलातः), डा0 गुंजेश्वर चौधरी (बघौलातः), डा0 शालिग्राम त्रिपाठी (दिल्लीतः), डा0 पीयूषकान्तदीक्षितः (दिल्लीतः), श्री हरिशरण मिश्रः (मैनपुरीतः), श्री ओमहरिः (एटातः), श्री नवलकिशोर चौधरी (दिल्लीतः), श्री विनोद पाण्डेयः (दिल्लीतः), इत्यादयो वक्तारः कवयश्च सहभागित्वमनुष्ठितवन्तः। देशस्य विविधविश्वविद्यालयेभ्यः सम्प्राप्ताः विद्वांसोऽस्मिन्नवसरे उपस्थिता आसन्।

अभ्यागतेभ्यः स्वागतं व्याहरता परिषन्महासचिवेन डा0 रमाकान्तशुक्लेन समारोहस्य संक्षिप्त इतिहासः विदुषा पुरः प्रस्तुत आशा च प्रकटीकृता यदायत्यां दिल्ल्यां प्रतिवर्षमयं समारोहो महतोत्साहेन सम्मानयिष्यते। तेन पण्डितराजजगन्नाथस्य राष्ट्रैक्यसाधनाया अपि परिचयः प्रदत्तः। कार्यक्रमस्य सञ्चालनं आचार्यडा0रवीन्द्रनागरेण कृतम्।

देववाणी-परिषदोऽष्टादशतमः स्थापनादिवसः

देववाणी-परिषदोऽष्टादशतमः स्थापनादिवसः 13.12.1993 ई. तारिकायां मैनपुर्यां 'माहेश्वरी सदने' सम्मानितोऽभूत्। उत्सवस्यास्याध्यक्ष्यं देववाणी-परिषदध्क्षैः 'अभिराज' डा0 राजेन्द्रमिश्रमहाभागैः किञ्च मुख्यातिथित्वं सागरस्थडाक्टरहरिसिंहगौरविश्वविद्यालयस्य संस्कृतविभागायध्क्षैः डा0 राधावल्लभत्रिपाठिभिः कृतम्। अस्मिन्नवसरे डा0त्रिपाठिभिः स्वहस्ताक्षरैः सम्भूष्य 'अर्वाचीनसंस्कृत'स्य पञ्चदशाब्दपूर्त्यंकः (15/4) डा0 राजेन्द्रमिश्र महाभागेभ्यः समर्पितः। परिषन्महासचिवेन किञ्च 'अर्वाचीनसंस्कृत'-सम्पादकेन डा0 रमाकान्तशुक्लेन संस्कृतपत्रिकाणां विषयानुक्रमणीनां सम्पादनस्यावश्यकता रेखांकिता। परिषत्सहसचिवो डा0 इच्छारामद्विवेदी धन्यवादज्ञापनमकरोत्।

अस्मिन्नेव दिने 'आर 6 वाणी विहारः, नयी दिल्ली-110059' इत्यत्र परिषदः कार्यक्रमाणां दृश्यश्रव्यसामग्र्या दर्शनश्रवणगोष्ठी अपि संयोजिता जाता।

देववाणी-परिषदस्त्रयोदशं, चतुर्दशं, पञ्चदशं, षोडशं च संयुक्तं वार्षिकमधिवेशनं सम्पन्नम्

'देववाणी-परिषद्, दिल्ली' त्येतस्याः संस्थायास्त्रयोदशं चतुर्दशं, पञ्चदशं षोडशं च संयुक्तं वार्षिकाधिवेशनं, मैनपुरीस्थसुरभारतीसेवासंस्थानस्यामन्त्रणे मैनपुर्यां माहेश्वरी-सदने 15.12.1993 ई. तारिकायां सम्पन्नम्।

अधिवेशनस्य प्रारम्भः परिषत्सहसचिव डा0 इच्छारामद्विवेद 'प्रणव' कृतेन मंगलाचरणेन जातः। परिषन्महासचिवेन डा0 रमाकान्तशुक्लेन अभ्यागतेभ्य स्वागतं व्याहरता विगतवर्षचतुष्टय व्यापिन्याः परिषत्प्रगतेर्विवरणं प्रस्तुतम्। अधिवेशनस्योद्घाटनं वाराणसीस्थडाक्टरसम्पूर्णानन्द संस्कृतविश्वविद्यालयस्य कुलपतिभिराचार्यश्रीवि0 वेंकटाचलमहाभागैः कृतम्। तैः संस्कृतस्य प्रचारप्रसारार्थं स्वयंसेविसंस्थानां भूमिका सविशेषमाकांक्षिता। तैः डा0 इच्छारामद्विवेदीप्रणीतस्य 'सत्प्रेरणा' नाटकस्य कम्प्यूटरमुद्रितपाण्डुलिपिरपि समुन्मीलिता। परिषदध्यक्षैः 'अभिराज' डा० राजेन्द्रमिश्रमहाभागैः स्वोद्बोधने संस्कृतस्य विविधपक्षानवलम्ब्य विचाराः प्रस्तुताः। तैः नवनिर्वाचितेभ्यः परिषदध्यक्षेभ्यो डा0 राधावल्लभ त्रिपाठिमहाभागेभ्यः स्वागतं व्याहृतम्। डा0 त्रिपाठिभिः स्वभाषणे समकालीनसंस्कृतरचनानाम् अध्ययनस्य, परिशीलनस्य, संशोधनस्य, समीक्षणस्य च आवश्यकता रेखांकिता। अस्मिन्नवसरे प्रो0 बटुकनाथ शास्त्रि खिस्तेमहाभागेभ्यः परिषदो मान्यसदस्यता समर्पिताभूत्। अधिवेशनेऽयं प्रस्तावः सर्वसम्मत्या पारितोऽभूत्ः-

"देववाणी-परिषदस्त्रयोदशं चतुर्दशं पञ्चदशं षोडशं च संयुक्तमिदमधिवेशनं केन्द्रीयभारतशासनं सर्वाणि च राज्यशासनतन्त्राणि प्रार्थयते यत् विविधास्वध्ययनशालासु संस्कृतभाषाध्ययनव्यवस्था निष्प्रत्यवाया करणीया। संस्कृतभाषा न केवलं भारतस्य अपितु निखिलविश्वस्य प्राचीनतमा समृद्धतमा ज्ञानविज्ञानकलासाहित्यदर्शनादिप्रचुरा भारती। न

तस्याः कयाचिदपि भाषया सह विरोधः। सा सर्वासां भारतीयभाषाणां जनयित्री, पोषयित्री संवर्धयित्री च। अत एव सर्वभाषाजननीकल्पायाः संस्कृतभाषाया अध्ययने शिक्षाया कस्मिन्नपि स्तरे न केनचिदवरोधेन भवितव्यम्। केनापि विषयेण साकं संस्कृतविषयस्याध्ययनं सुनिश्चेतुं शिक्षानिकायैर्विश्वविद्यालयैश्च व्यवस्था विधेया।

किञ्च संस्कृतविश्वविद्यालयाः सविशेषं प्रार्थ्यन्ते यत्ते स्वसम्बद्धविद्यालयेषु प्रवेशार्थं टी० सी० /माइग्रेशन-प्रमाणपत्रस्यानिवार्यतां शिथिलयन्तु येन विज्ञानवाणिज्यादिपाठ्यक्रमानध ीयानाश्छात्रा अपि समनन्तरमेव संस्थागतच्छात्ररूपेण पारम्परिकसंस्कृतविद्याया अध्ययनमपि कर्तुं लब्धावकाशाः स्युः। अनया व्यवस्थया एकतः संस्कृतच्छात्राणां संख्या वर्धिष्यते, अपरतश्च विभिन्नानुशासनानामध्येतारः संस्कृतेन परिचिताः सन्तः स्वज्ञानकोषस्य मूलमन्वेष्टुं समर्थाः भविष्यन्तीति विश्वसितीदमधिवेशनम् सर्वसम्मत्या च प्रस्तावमिममंगीकरोति।''

परिषदो नवनिर्वाचित कार्यसमितिरित्थं गठिताऽभूत् – **अध्यक्षः** – डा० राधावल्लभ त्रिपाठी, **उपाध्यक्षा**- श्रीमती रमा शुक्ला, **महासचिवः**- डा० रमाकान्त शुक्लः, **सहसचिवः**- डा० रवीन्द्र नागरः, **कोषाध्यक्षः**-श्री वेदप्रकाश गौतमः, **सदस्याः**-डा० विष्णुकान्त शुक्लः, डा० चन्द्रमौलि शुक्लः, श्री आनन्दवर्धन शुक्लः, डा० इच्छाराम द्विवेदी, डा० भास्कराचार्य त्रिपाठी, 'अभिराज' डा० राजेन्द्र मिश्रश्च।

अधिवेशनस्य समापनं संस्कृतकविसम्मेलनेन किञ्च मैनपुरीस्थ-कुँवर आर० सी० महिला-स्नातकोत्तर-महाविद्यालयस्य छात्राभिः प्रस्तुतैः संस्कृतसमूहगानैरभवत्।

धन्यवादज्ञापनं परिषदुपाध्यक्षैः डा० विष्णुकान्तशुक्लमहाभागैः कृतम्।

(आनन्दवर्धन शुक्लः)

संस्कृतजगद्वार्ताः

अत्र स्थानानुरोधात् केवलं शीर्षका एव दीयन्ते-

दिल्ली संस्कृत अकादमी:- नवोदितसंस्कृतकविप्रतियेगिता (28-10-1993) एकलश्लोकसंगीतप्रतियोगितासमारोहः (29-10-1993), वाल्मीकिरामायणे बन्धुत्व भावनेति विषयमवलम्ब्य संगोष्ठी (30-10-1993), चतुर्दिवसीयपश्चिममण्डलीयसंस्कृत प्रतियोगितासमुद्घाटनसमारोहः (1-11-1993) अकादमी सहयोगिसम्मानः (2-11-1993) चतुर्दिवसीयमध्यममण्डलीयसंस्कृतप्रतियोगितासमुद्घाटनसमारोहः (8-11-1993) चतुर्दिवमीयो त्तरमण्डलीयसंस्कृतप्रतियोगितासमुद्घाटनसमारोहः (17-11-1993) महाविद्यालयीय श्लोकसंगीतप्रतियोगितासमारोहः (19-11-1993) हिन्दी-उर्दू-पंजाबी-संस्कृत अकादमी-राष्ट्रियैकता-गोष्ठी (24-11-1993) संस्कृतप्रतिभापुरस्कारसमारोहः (20-11-1993) स्नातक /स्नातकोत्तर /मध्यमास्तरीयसंस्कृतभाषणप्रतियोगिता (27-11-1993) कालिदासजयन्त्युपलक्ष्येऽक्षरश्लोकप्रतियोगिता मेघदूतसंगीतात्मकध्वन्यंकनस्य लोकार्पणं च (18-12-1993) हिन्दी-उर्दू-पंजाबी-संस्कृत- अकादमीनां संयुक्तोत्सवः सद्भावना समागमः (31-12-1993) गुरुगोविन्दसिंहरचिते साहित्ये संस्कृतस्य प्रभावः- संगोष्ठी (18-1-1994), गणतन्त्रदिवसोपलक्ष्ये अ० भा० संस्कृत कवि सम्मेलनम् (21-1-1994)

श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृतविद्यापीठम् नव दिल्ली म० म० आचार्य पं० पट्टाभिरामशास्त्रीस्मारकव्याख्यानमाला (27-28.10.1993) निवृत्त कुलाधिपतीनां श्रीत्रिलोकीनाथचतुर्वेदमहोदयानामभिनन्दनं वर्तमानकुलधिपतीनामचार्य श्री वि० वेंकटा-चलम्-महोदयानां स्वागतम् (29-10-1993), राष्ट्रपतिभवने विशेषदीक्षान्त-समारोहे

महामहिमडा0शंकरदयालशर्ममहोदयेभ्यो 'वाचस्पति' मानदोपाधिसमर्पणम् (3-12-1993)

3. **मध्य प्रदेश संस्कृत अकादमी**- सागरविश्वविद्यालये नवोदितप्रतिभासमागमः (7,8-11-1993), ग्वालियरे भवभूति-समारोहः (21,22,23-1-1994).

4. **श्री संकीर्तन- भवन न्यासः दिल्ली**- श्री प्रभुदत्तब्रह्मचारिणां जन्मोत्सवः (30.10.1993 - 7.11.1993)

5. **शासकीयसंस्कृतमहाविद्यालयः, रीवा**- वैदिक लौकिके च संस्कृते मानवीयमूल्यानि लोकचिन्तनं चे' ति विषयमवलम्ब्य शोधसंगोष्ठी (24,25-1-1994)

6. **उज्जयिन्यां कालिदाससमारोहः**- (24-12-1993- 30-12-1993)

7. **श्रीविद्वद्वैद्यपरिषद्दिल्ली**- संसदीयशोधसमागारे धन्वन्तरिजयन्तीसमारोहः (11-11-1993)

8. **श्रीकृष्णप्रणामीसंस्कृतमहाविद्यालयः, भिवानी**- अखिलभारतीयसंस्कृत सम्मेलनम् (19-11-1993)

9. **एकेडेमी आफ संस्कृत रिसर्च मेलकोटे**- न्यायमूर्ति एम. एन. वेंकटाचलैय्याद्वारा पुस्तकालयस्योद्घाटनम् (7-11-1993)

10. **आकाशवाणी दिल्ली**- साहित्यिक्यां डा0 रामकरणशर्मणः काव्यपाठः, डा0 रमाकान्तशुक्लस्य संस्कृतगतिविधीनवलम्ब्य वार्ता (12-12-1993) सर्वभाषाकविसम्मेलने डा० रामकरणशर्मणः संस्कृतकवितापाठः (25.1.1994)

11. **दिल्ली दूरदर्शनम्**- स्पोर्ट्स चैनले 'भाति मे भारतम्' इति कार्यक्रमस्य विंशति भागानां प्रसारणम् (8-1-1994)

12. **सुरभारती सेवासंस्थानम् मैनपुरी**- अ0 भा0 संस्कृतमहोत्सव; स्व. पं0 वेणी माधवद्विवेदीस्मृतिव्याख्यानम्, साम्प्रतिकसंस्कृतसाहित्यमवलम्ब्य परिचर्चा, कवि सम्मेलनम्, शोधसंगोष्ठी, संस्कृत-भाषण-वादविवाद-श्लोकपाठ-गती-प्रतियोगिताः, विद्वदभिनन्दनम् (13,14,15-12-1993).

13. **अखिलभारतीयसंस्कृतसम्मेलनं कर्णपुरम्**- त्रिदिवसीयमायोजनम्, अमृत महोत्सवः, परिचर्चा, शोधगोष्ठी, कविगोष्ठी, गीतसंगीतसांस्कृतिककार्यक्रमः, समापनसमारोहः पुरस्कारवितरणं च (12,13,14-12-1993).

14. **राष्ट्रपतिभवनम् नई दिल्ली**- पं० आद्याचरणझाप्रणीतस्य कम्बरामायणविषयकस्य संस्कृतग्रन्थस्य हिन्दीरूपान्तरस्य महामहिमराष्ट्रपतिडा०शंकरदयालशर्मभिः स्वीकारः (20-12-1993)

15. **मेरठ विश्वविद्यालयः**- व्यास-समारोहः (15,16,17-12-1993)

16. **'अभिराज' डा० राजेन्द्रमिश्रमहाभाग्य** जानकीजीवन-महाकाव्यार्थं के० के० बिरला फाउण्डेशन-वाचस्पतिपुरस्कारः (22-12-1993)

17. **डा0 सम्पूर्णानन्द विश्वविद्यालयः वाराणसी**- डा0 सम्पूर्णानन्दजन्मशताब्दी पूर्तिमहोत्सवः, परिचर्चा, शास्त्रार्थः, संस्कृतकविसम्मेलनम्, विदुषां भाषणानि, विविधाः प्रतियोगिताः (2-7. 1. 1994)

18. **श्रीजगन्नाथसंस्कृतविश्वविद्यालयः पुरी** विशिष्टव्याख्यानकार्यक्रमः (6. 1. 94)

19. **मेलबोर्ने** विश्वसंस्कृतसम्मेलनम् (9-15.1.1994)

20. **डा० जीतसिंहखोखरमहाभागाय** पंजाब-सर्वकार-भाषा विभाग-'शिरोमणि संस्कृतसाहित्यकारपुरस्कारः (1992)' (26.1.1994)

(रमा शुक्ला)

परमानन्दगुरून् प्रति!

पं0 भगवद्दत्त गौडः

अपहाय भुवं गतो भवान् ननु नाको भवदीप्सितोऽभवत्।
रुदिमो वयमत्र सास्रवः परमानन्दगुरो! शुचाकुलाः।।1।।

मृदुकूजितछद्मना गुरो! किमु गायन्ति बहुत्र ते यशः।
विलपन्त्यथवा नु मन्युना[1] तरुशाखनिलया द्विजालयः।2।।

मुमुचुर्न घनाः हि केवलं नभसो वृष्टिमिषेण भूतले।
मुमुचेऽश्रुकणान् निशाप्यहो अपदेशेन तुषारविप्रुषाम्।।3।।

गुरुकल्प गुरो त्वया विना क्व नु यायात् सुरवाक् बताधुना।
सुवहेदितरश्च को भरं विदुषां शास्त्रजुषां सुदुर्भरम्।।4।।

जनिमेव हि नो[2] गुरोः भुवि न नु देवा हि विषेहिरे दिवि।
सुरयाचित एवं यातवाँस्त्रिदिवं तीर्णभवार्णवो भवान्।।5।।

जनता कियतीव शिक्षिता सुरवाचोऽपि सुविस्तरः कृतः।
विपुलं समुपार्जितं यशो भवता भूमितले सता सता।।6।।

भुवि पण्डितमण्डली समा[3] तव पाण्डित्यनिरस्तविक्रमा।
किमियाय न मौनमागमे भवतां विज्ञसभांसमागमे।।7।।

निगमागममन्थनो भवान् इतरो मन्दर एवं जातवान्।
कवि[4]मित्र[5]बुधै[6]र्युतो भुवि न परो गीष्पतिरेव तस्थिवान्।।8।।

टिप्पण्यः-1. शोकेन, 2. अस्माकं, 3. सर्वा, 4. कविः = 1. शुक्राचार्यः 2. कविरत्नश्रीब्रह्मानन्दशुक्लः, 5. मित्रः = 1. सूर्यः, 2. पण्डितमदनमोहनमालवीय - श्री प्रभुदत्तगौडादिसुहृद्गणः, 6. बुधः - 1. ग्रहविशेषः 2. श्री कुवेरदत्तशास्त्रिप्रभृतिविद्वान्

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

(अस्य सूच्यां क्रमशः ग्रन्थस्य क्रमसंख्या लेखकः/सम्पादकः, १५.१०.१९९३ तः प्रभावि रूप्यकेषु मूल्यं च दीयन्ते।)

२.	सुगमरामायणम् (आचार्य रमेशचन्द्र शुक्लः)	Rs. 150.00
५.	श्रीकृष्णचरितम् (आचार्य रमेशचन्द्र शुक्लः)	Rs. 150.00
१३.	भारतस्वातन्त्र्यसंग्रामेतिहासः (आचार्य डा० रमेशचन्द्र शुक्लः)	Rs. 150.00
१९.	कालिदास की कला और संस्कृति (II) (डा० देवीदत्त शर्मा)	Rs. 150.00
२३.	राधाकृष्णरसायनम् (पं० ओट्टूर उण्णि नम्बूदिरीपादः)	Rs. 150.00
२८.	स्फूर्तिसप्तशती (डा० शिवदत्त शर्मा चतुर्वेदी)	Rs. 150.00
२९.	साहित्यकौतुकम् (प० टी० वी० परमेश्वर अय्यरः)	Rs. 150.00
३१.	संस्कृत साहित्य में राष्ट्रिय भावना (I) (डा० हरिनारायण दीक्षितः)	Rs. 150.00
३२.	श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्)	Rs. 150.00
३५.	संस्कृत साहित्य में राष्ट्रिय भावना (II) (डा० हरिनारायण दीक्षितः)	Rs. 150.00
३६.	संस्कृत साहित्य में राष्ट्रिय भावना (III) (डा० हरिनारायण दीक्षितः)	Rs. 150.00
४२.	पुरश्चरणकमलम् (डा० रमाकान्त शुक्लः)	Rs. 10.00
४४.	रसदर्शनम् (द्वितीयसंस्करणम्) (डा० रमेशचन्द्र शुक्लः)	Rs. 150.00
४५.	संस्कृत साहित्य में राष्ट्रिय भावना (सम्पूर्ण) (डा० हरिनारायण दीक्षितः)	Rs. 300.00
४६.	आराधना (डा० मण्डन मिश्रः)	Rs. 10.00
४७.	भाति मौरीशसम् (डा० रमाकान्त शुक्लः)	Rs. 10.00
४९.	कूहा (डा० उमाकान्त शुक्लः)	Rs. 60.00
५०.	पण्डितराजीयम् (डा० रमाकान्त शुक्लः)	Rs. 60.00
५२.	अभिशापम् (डा० रमाकान्त शुक्लः)	Rs. 60.00
५३.	सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः 'विनयः')	Rs. 60.00
५८.	काव्याञ्जलिः (सं० रमाकान्त शुक्लः)	Rs. 150.00
५९.	अध्यात्मरामायण में अध्यात्मचिन्तन (पं० त्रिगुणानन्द शुक्ल)	Rs. 150.00
६२.	संस्कृतसेवकः स्वामिनाथः (डा० रमाकान्त शुक्लः)	Rs. 150.00
६४.	लक्ष्मीशतकम् (डा० वरदाचार्य कण्णन्)	Rs. 60.00
६५.	ऋतम् (डा० केशवचन्द्र दाशः)	Rs. 60.00
७२.	श्रीगान्धिचरितम् (प्रो० चारुदेव शास्त्री)	Rs. 150.00
७४.	दूतप्रतिवचनम् (डा० इच्छाराम द्विवेदी 'प्रणवः')	Rs. 60.00
७५.	भाति मे भारतम् (तृतीयसंस्करणं) (डा० रमाकान्त शुक्लः)	Rs. 18.00
७६.	अर्वाचीनसंस्कृतसाहित्यपरिचयः (II) (सं० डा० रमाकान्त शुक्लः)	Rs. 150.00
७७.	'अर्वाचीनसंस्कृत' संग्रहः (I) (सं० डा० रमाकान्त शुक्लः)	Rs. 300.00
७८.	'अर्वाचीनसंस्कृत' संग्रहः (II) (सं० डा० रमाकान्त शुक्लः)	Rs. 300.00
७९.	'अर्वाचीनसंस्कृत' संग्रहः (III) (सं० डा० रमाकान्त शुक्लः)	Rs. 300.00
८१.	नाट्यसप्तकम् (डा० रमाकान्त शुक्लः)	Rs. 200.00
८२.	जय भारतभूमे (द्वितीयसंस्क०) (डा० रमाकान्त शुक्लः)	Rs. 30.00
८३.	श्रीहनूमत्पञ्चाशत् तथा शरणागतिषोडशी (श्री० सुन्दरराजः)	Rs. 10.00
८४.	भारतजनताहम् (कवितासंग्रहः) (डा० रमाकान्त शुक्लः) (यन्त्रस्थः)	Rs. 200.00
८५.	सत्प्रेरणा (नाटकम्) (डा० इच्छाराम द्विवेदी 'प्रणवः') (यन्त्रस्थम्)	Rs. 250.00

प्रकाशिका देववाणी-परिषद् , दिल्ली, आर-6 वाणी विहारः, नयी दिल्ली-110059

DEVAVANI PARISHAD, DELHI

R-6, VANI VIHAR, NEW DELHI-110059 (INDIA) - (PHONE: 5553499)

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

१.	श्रीगान्धिचरितम् (प्रो० चारुदेव शास्त्री)	रु० ५०.००
२.	श्रीनेहरूवृत्तम् (आचार्य रमेशचन्द्र शुक्लः)	रु० १५.००
३.	श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (डा० स्वामिनाथन्)	रु० ८०.००
४.	कूहा (काव्यम्) (डा० उमाकान्त शुक्लः)	रु० २०.००
५.	सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः)	रु० १५.००
६.	आभाणकमञ्जरी („ „)	रु० १५.००
७.	जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ३०.००
८.	अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) („)	रु० ३०.००
९.	„ „ „ (द्वितीय खण्डः) („)	रु० ५०.००
१०.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु० ४०.००
११.	निकषा (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु० २०.००
१२.	दूतप्रतिवचनम् (डा० इच्छाराम द्विवेदी)	रु० २०.००
१३.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० १८.००
१४.	संस्कृतसाहित्य में राष्ट्रिय भावना (डा० हरिनारायण दीक्षित)	रु० १५०.००
१५.	दयानन्दसूक्तिसप्तशती (श्री शिव कुमार मिश्रः)	रु० १५.००
१६.	गान्धिसूक्तिसप्तशती („ „)	रु० १५.००
१७.	सुगमरामायणम् (डा० रमेशचन्द्र शुक्लः)	रु० ३०.००
१८.	साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः)	रु० ४०.००
१९.	पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः)	रु० २०.००
२०.	मकूतिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु० ३०.००
२१.	रसदर्शनम् (डा० रमेशचन्द्र शुक्लः)	रु० ५०.००
२२.	श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
२३.	सुरभिकाश्मीरम् („) („)	रु० २०.००
२४.	पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० १०.००
२५.	श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन)	रु० १०.००
२६.	पण्डितराजीयम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० २०.००
२७.	नाट्यसप्तकम् („ „)	रु० ६०.००
२८.	श्रीगरुडध्वजसपादशतकम् (डा० रामकिशोर मिश्रः)	रु० १२.००
२९.	लक्ष्मीशतकम्, (डा० वरदाचार्यकण्णन)	रु० २१.००
३०.	अध्यात्मरामायण में अध्यात्म-चिन्तन (श्रीत्रिगुणानन्द शुक्ल)	रु० ४०.००
३१.	भाति मौरीशसम् (डा० रमाकान्त शुक्लः)	रु० १०.००
३२.	सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः)	रु० २०.००
३३.	अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० २०.००
३४.	ऋतम् (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु० २०.००

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५९.